भूमिका ।

समुपजोषमयैतन्मुद्राप्य प्रकाश्यते श्रीमद्वामनपुराणं श्रीमद्भगवत्कृष्णद्वैपायनप्रणीतमेतदिति सुव्यक्तमेव विदाम्पुरः ।

अत्र च श्रीमद्भगवतो विष्णोर्वामनावतारचरितामृतवर्णनमेव प्रायेण सविस्तरमुपनिबबन्ध स महामुनिर्यतस्ततः तत्सहभूतमन्यदपि तदीयशिवमूर्तिमहिमवर्णनादिकमत्रास्तीत्यनुक्रमण्येवावेदयिष्यति ।

यद्यप्येतत्पुस्तकं मूलमात्रं क्वचिदेव सटिप्पणं पुण्यपत्तने जगद्धितेच्छुयन्त्रालये पुरा मुद्राप्य प्रकाशितं तथापि तन्मातृकापुस्तकानामनतिशुद्धतया क्वचित्क्वचित्स्खलनमाकलय्य शोधकसम्पादितवङ्गाक्षरमुद्रितान्यमुद्रितानि च कियन्त्यपि पुस्तकान्यासाद्य बरेलीनिवासित्रिपाठ्युपनामकैः, कान्यकुब्जकुलालङ्कारभूतैः श्यामलालशर्मपण्डितवर्यैः संशोधयित्वा तैरेव हिन्दीभाषाटीकां सामान्यधिषणदिदृक्षुजनसौलभ्याय कारयित्वा लाभमनादृत्य व्ययीकृतद्रव्यमात्रद्रव्यमूल्याधिकग्रहणानभिलाषिणाऽनादिग्रन्थप्रकाशमात्रलिप्सुना मया मूलमात्रं भाषामात्रं भाषाटीकासहितं च पुस्तकत्रयात्मकं पुराणमिदं पृथक्पृथक् अस्मदीये "श्रीवेङ्कटेश्वर" नाम्नि (स्टीम्) मुद्राक्षरयन्त्रालये मुद्राप्य प्रकाशमानं जागर्ति ।

प्रार्थयामहे च तदिदं स्वयं संगृह्य तत्पठनादिजनितश्रेयोविशेषाननवरतं संपाद्य कृपया मय्यप्याशिष आशासयद्भिः यद्यत्र बहुधा संशोधितेऽपि सीसकाक्षरयोजकदोषेण शोधकदृष्टिदोषेण वाऽशुद्धिरवशिष्येत तदा तद्विचार्य संशोध्य सन्तोष्टव्यं गुणैकपक्षपातिभिर्दूषणवाचंयमैर्धीरधिषणैः वर्णाश्रमधर्मपरिपालननिष्ठागरिष्ठैः । "यत्नेन गच्छतः क्वापि स्खलनं स्यान्महीयसः । हसन्त्यसाधवस्तत्र समादधति सज्जनाः ॥" इति शम् ।

विद्वज्जनकृपाकांक्षी–खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयाध्यक्षः–मुंबई.

अथ वामनपुराणस्य विषयानुक्रमणिका प्रारभ्यते ।

शंकरस्यैवसव्येकरतलेऽपतत् ॥ पततेनकदाचिच्चतदाकरतलाच्छिरः ॥ ३८ ॥ अथक्रोधावृतेनाथब्रह्मणाद्भुतकर्मणा ॥ सृष्टस्तुपुरुषोधी
मान्कवचीकुंडलीशरी ॥ ३९ ॥ धनुःपाणिर्महाबाहुर्वाणशक्तिधरोऽव्ययः ॥ चतुर्भुजोमहातूणीआदित्यसमदर्शनः ॥ ४० ॥ सत्वाहगच्छ
दुर्बुद्धेमात्वांशूलिन्निपातये ॥ भवान्पापसमायुक्तःपापिष्ठंकोजिघांसति ॥ ४१ ॥ इत्युक्तःशंकरस्तेनपुरुषेणमहात्मना ॥ प्रियायुक्तोजगामा
थरुद्रो वदरिकाश्रमम् ॥ ४२ ॥ नरनारायणस्थानंपर्वतेहिहिमालये ॥ सरस्वतीयत्रपुण्यास्यंदतेसरितांवरा ॥ ४३ ॥ तत्र गत्वाचतंदृष्ट्वा
नारायणमुवाचह ॥ भिक्षांप्रयच्छभगवन्महाकारुणिकोसिभोः ॥ ४४ ॥ इत्युक्तोधर्मपुत्रस्तुरुद्रंवचनमब्रवीत् ॥ सव्यंभुजंताडयस्वत्रिशू
लेनमहेश्वर ॥ ४५ ॥ नारायणवचःश्रुत्वात्रिशूलेनमहेश्वरः ॥ सव्यंनारायणभुजंताडयामासवेगवान् ॥ ४६ ॥ त्रिशूलाभिहतान्मार्गात्ति
स्रोधाराविनिर्ययुः ॥ एकागगनमाश्रित्यस्थितातारभिमंडितम् ॥ ४७ ॥ द्वितीयान्यपतद्भूमौतांजग्राहतपोधनः ॥ अत्रिस्तस्मात्समुद्भू
तोदुर्वासाःशंकरांशतः ॥ ४८ ॥ तृतीयान्यपतद्धाराकपालेरौद्रदर्शने ॥ तस्माच्छिशुःसमभवत्संनद्धःकवचीयुवा ॥ ४९ ॥ श्यामावदा
तःशरचापपाणिर्गर्जन्यथा प्रावृषितोयदोऽसौ ॥ इत्थंब्रुवन्कस्यविनाशयामिस्कंधाच्छिरस्तालफलंयथैव ॥ ५० ॥ तंशंकरोवेत्यवचोवभा
षेनरंहिनारायणवाहुजातम् ॥ निपातयैनंनरदुष्टवाक्यंब्रह्मात्मजंसूर्यशतप्रकाशम् ॥ ५१ ॥ इत्येवमुक्तःसतुशंकरेणआद्यंधनुस्त्वाजगवंप्र
सिद्धम् ॥ जग्राहतूणानितथाक्षयाणियुद्धायवीरःसमतिंचकार ॥ ५२ ॥ ततःप्रवुद्धौसुभृशंमहावलौब्रह्मात्मजोवाहुभवश्चशार्वः ॥ दिव्यंसह
स्रंपरिवत्सराणांततोहरेणापिविरिंचिरूचे ॥ ५३ ॥ जितस्त्वदीयःपुरुषःपितामहनरेणदिव्याद्भुतकर्मणावली ॥ महापृषत्कैरभिपत्यता
डितस्तदद्भुतंचेहदिशोदशैव ॥ ५४ ॥ ब्रह्मातमीशंवचनंवभाषेनेहास्यजन्मन्यजितस्यशंभो ॥ पराजितंचैष्यतेऽसौत्वदीयोनरोमदीयः

पुरुपोमहात्मा ॥ ५५ ॥ इत्येवमुक्त्वावचनंत्रिनेत्रं चिक्षेपसूर्येपुरुषंविरंचिः ॥ नरंनरस्यैवतदासावेग्रहाचक्षेपधर्मप्रभवस्यदेवः ॥ ५६ ॥
इतिश्रीवामनपुराणेहरललिते नरोत्पत्तिप्रलयोनामद्वितीयोऽध्यायः ॥ २ ॥ पुलस्त्यउवाच ॥ ततःकरतलेरुद्रःकपालेदारुणेस्थिते ॥
संतापमगमद्ब्रह्मंश्चिंतयाकुलितेंद्रियः ॥ १ ॥ ततःसमागतारौद्रानीलांजनचयप्रभा ॥ संरक्तमूर्धजाभीमाब्रह्महत्याहरांतिकम् ॥ २ ॥ तामा
गतांहरोदृष्ट्वापप्रच्छविकरालिनीम् ॥ कासित्वमागतारौद्रेकेनाप्यर्थेनतद्वद ॥ ३ ॥ कपालिनमथोवाचब्रह्महत्यासुदारुणा ॥ ब्रह्महत्यास्मि
संप्राप्तामांप्रतीच्छत्रिलोचन ॥ ४ ॥ इत्येवमुक्त्वावचनंब्रह्महत्याविवेशतम् ॥ त्रिशूलपाणिनंरुद्रंसंप्रतापितविग्रहम् ॥ ५ ॥ ब्रह्महत्याभि
भूतश्चशर्वोबदरिकाश्रमम् ॥ आगच्छन्नोददर्शाथनरनारायणावृषी ॥ ६ ॥ अदृष्ट्वाधर्मतनयौचिंताशोकसमन्वितः ॥ जगामयमुनांस्नातुं
सापिशुष्कजलाऽभवत् ॥ ७ ॥ कालिंदींशुष्कसलिलांनिरीक्ष्यवृषकेतनः ॥ प्लक्षजांस्नातुमगमदंतर्द्धानंचसागता ॥ ८ ॥ ततोऽनुपुष्करा
रण्यंमागधारण्यमेवच ॥ सैंधवारण्यमेवासौगत्वाश्रांतोयदृच्छया ॥ ९ ॥ तथैवनिमिषारण्यंधर्मारण्यंतथेश्वरः ॥ स्नातोनैवचसारौद्राब्रह्मह
त्याव्यमुंचत ॥ १० ॥ सरित्सुतीर्थेषुतथाश्रमेषुपुण्येषुदेवायतनेषुसर्वतः ॥ समाप्लुतोयोगयुतोपिपापान्नावापमोक्षंवृषभध्वजोऽसौ ॥ ११ ॥
ततोजगामनिर्विण्णःशंकरःकुरुजांगलम् ॥ तत्रगत्वाददर्शाथचक्रपाणिंखगस्थितम् ॥ १२ ॥ तंदृष्ट्वापुंडरीकाक्षंशंखचक्रगदाधरम् ॥ कृतां
जलिपुटोभूत्वाहरःस्तोत्रमुदीरयत् ॥ १३ ॥ हरउवाच ॥ नमस्तेदेवतानाथनमस्तेगरुडध्वज ॥ शंखचक्रगदापाणेवासुदेवनमोऽस्तुते ॥
॥ १४ ॥ नमस्तेनिर्गुणानंतअप्रतर्क्यायवेधसे ॥ ज्ञानाज्ञाननिरालंबसर्वालंबनमोऽस्तुते ॥ १५ ॥ रजोयुक्तनमस्तेस्तुब्रह्ममूर्त्तेसनातन ॥ ॥३॥
त्वयासर्वमिदंनाथजगत्सृष्टंचराचरम् ॥ १६ ॥ सत्त्वाधिष्ठितलोकेशविष्णुमूर्त्तेअधोक्षज ॥ प्रजापालमहाबाहोजनार्दननमोऽस्तुते ॥ १७ ॥

तमोमूर्त्तेअहंह्येषत्वदंशक्रोधसंभवः ॥ गुणाभियुक्तोदेवेशसर्वव्यापिन्नमोऽस्तुते ॥ १८ ॥ भूरियंत्वंजगन्नाथजलमम्बरपावकौ ॥ वायुर्बुद्धिर्म
नश्चापिशर्वरीत्वंनमोस्तुते ॥ १९ ॥ धर्मोयज्ञस्तपःसत्यमहिंसाशौचमार्जवम् ॥ क्षमादानंदयालक्ष्मीर्ब्रह्मचर्यंत्वमीश्वरः ॥ २० ॥ त्वंसांगा
श्चचतुर्वेदास्त्वंवेद्योवेदपारगः ॥ उपवेदोभवानीशसर्वोसित्वंनमोऽस्तुते ॥ २१ ॥ नमोनमस्तेऽच्युतचक्रपाणेनमोऽस्तुतेवामनमीनमूर्त्ते ॥
लोकेभवान्कारुणिकोमतोमेत्रायस्वमांकेशवपापबंधात् ॥ २२ ॥ ममाशुभंनाशयविग्रहस्थंयद्ब्रह्महत्याभिभवंबभूव ॥ दग्धोस्मिनष्टोस्म्य
समीक्ष्यकारीपुनीहिनाथोसिनमोनमस्ते ॥ २३ ॥ पुलस्त्य उवाच ॥ एवंस्तुतश्चक्रधरःशंकरेणमहात्मना ॥ प्रोवाचभगवान्वाक्यंब्रह्महत्या
क्षयायहि ॥ २४ ॥ हरिरुवाच ॥ महेश्वरशृणुष्वेमांममवाचंकलस्वनाम् ॥ ब्रह्महत्याक्षयकरींशुभदांपुण्यवर्द्धनीम् ॥२५॥ योसौब्रह्मांडके
पुण्येमदंशप्रभवोऽव्ययः ॥ प्रयागेवसतेनित्यंयोगशायीतिविश्रुतः ॥ २६ ॥ चरणाद्दक्षिणात्तस्यविनिर्यातासरिद्वरा ॥ विश्रुतावरणेत्येवंसर्व
पापहराशुभा ॥ २७ ॥ सरिदन्याद्वितीयाच्चआसीरित्येवविश्रुता ॥ तेउभेतुसरिच्छ्रेष्ठेलोकपूज्येबभूवतुः ॥ २८ ॥ तयोर्मध्येतुयोदेशस्तत्क्षे
त्रंयोगशायिनः ॥ त्रैलोक्यप्रवरंतीर्थंसर्वपापप्रमोचनम् ॥ २९ ॥ तत्तादृशास्तिनगरीपुण्यावाराणसीशुभा ॥ यस्यांहिभोगिनोपीशप्रयांति
भवतोलयम् ॥ ३० ॥ विलासिनीनांरशनास्वनेनश्रुतिस्वरोब्राह्मणपुंगवानाम् ॥ शुचिस्वरत्वंगुरवोनिशम्यहास्यान्विताःसन्तिमुहुर्मुहुस्ताः
॥ ३१ ॥ व्रजत्सुयोषित्सुचतुःपथेपुपदान्यलक्तारुणितानिदृष्ट्वा ॥ ययौशशीविस्मयमेवयस्यांकिंस्वित्प्रयातास्थलपद्मनीयम् ॥३२॥ तुंगा
नियस्यांसुरमंदिराणिरुंधंतिचंद्रंरजनीमुखेषु ॥ दिवापिसूर्यंपवनान्विताभिर्दीर्घाभिरेवंसुपताकिकाभिः ॥३३॥ भृंगाश्चयस्यांशशिकांतभित्तौ
प्रलोभ्यमानाःप्रतिबिंबितेषु ॥ आलक्ष्ययोपिद्विमलाननाब्जेष्वीयुर्भ्रमान्नैवचपुष्पकांतरम् ॥ ३४ ॥ परिश्रमूश्चापिमुमन्ति [illegible] संमोहनखेल
३५ ॥ [illegible] ॥ रूपयोद

वा०पु० नेन ॥ यस्यांजलक्रीडनसंगतासुनस्त्रीपुशंभोगृहदीर्घिकासु ॥३५॥ नचैवकश्चित्परमादशाणरुणाद्धशंभोसहमारुत[illegible]चावलानांतरसा
याया: विषया:
॥४॥ पराक्रमंकरोतियस्यांसुरतंहिमुक्त्वा ॥३६॥ पाशग्रंथिर्गजेंद्राणांदानच्छेदोमदच्युतौ ॥ यस्यांमानमदौपुंसांकरिणांयौवनागमे ॥३७॥ प्रिय अ०
दोषाःसदायस्यांकौशिकानेतरेजनाः ॥ तारागणेऽकुलीनत्वंमेघेवृत्तच्युतिर्विभो ॥ ३८ ॥ भूतिलुब्धाविलासिन्योभुजंगपरिवारिताः ॥
चंद्रभूषितदेहाश्चयस्यांत्वमिवशंकर ॥ ३९ ॥ ईदृशायांसुरेशानवाराणस्यांमदाश्रमे ॥ वसतेभगवाँल्लोलःसर्वपापहरोरविः ॥ ४० ॥ दशा ४
श्वमेधंयत्प्रोक्तंमदंशोयत्रकेशवः ॥ तत्रगत्वासुरश्रेष्ठपापमोक्षमवाप्स्यसि ॥४१॥ इत्येवमुक्तोगरुडध्वजेनवृषध्वजस्तंशिरसाप्रणम्य ॥ जगा
मवेगाद्गरुडोयथाऽसौवाराणसींपापविमोचनाय ॥४२॥ गत्वासुपुण्यांनगरींसुतीर्थांदृष्ट्वाचलोलंसदशाश्वमेधम् ॥ स्नात्वाचतीर्थेषुविमुक्तपापः
सकेशवंद्रष्टुमुपाजगाम ॥४३॥ केशवंशंकरोदृष्ट्वाप्रणिपत्येदमब्रवीत् ॥ त्वत्प्रसादाद्धृषीकेशब्रह्महत्याक्षयंगता ॥४४॥ नेदंकपालंदेवेशमद्ध
स्तंपरिमुंचति ॥ कारणंवेद्मिनैवैतत्तन्मेत्वंवक्तुमर्हसि ॥४५॥ पुलस्त्यउवाच ॥ महादेववचःश्रुत्वाकेशवोवाक्यमब्रवीत् ॥ विद्यतेकारणंवत्स
तत्सर्वंकथयामिते॥४६॥योऽसौममाग्रतोदिव्योह्रदःपद्मोत्पलैर्वृतः ॥ एषतीर्थवरःपुण्योदेवगंधर्वपूजितः ॥ ४७ ॥ एतस्मिन्प्रवरेपुण्येस्नानं
शोभनमाचर ॥ स्नातमात्रस्यचाद्यैवकपालंपरिमोक्ष्यति॥४८॥ततःकपालीलोकेचख्यातोरुद्रभविष्यसि॥कपालमोचनेत्येवंतीर्थंचेदंभविष्य
ति॥४९॥ पुलस्त्यउवाच॥एवमुक्तःसुरेशेनकेशवेनमहेश्वरः ॥ कपालमोचनेसस्नौवेदोक्तविधिनामुने ॥५०॥ स्नातस्यतीर्थेत्रिपुरांतकस्यपरि
च्युतंहस्ततलात्कपालम् ॥ नाम्नाबभूवाथकपालमोचनंतत्तीर्थवर्यंभगवत्प्रसादात् ॥५१॥ इतिश्रीवामनपुराणेपुलस्त्यनारदसंवादेहरललितो
नामतृतीयोऽध्यायः ॥३॥ पुलस्त्य उवाच ॥ एवंकपालीसंजातोदेवपेंभगवान्हरः ॥ अनेननकारणेनासौदक्षेणननिमंत्रितः ॥१॥ एतस्मिन्नंतरेदे ॥४॥

वींद्रष्टुंगौतमनंदनी ॥ जयाजगामशैलेंद्रंमंदरंचारुकंदरम् ॥ २ ॥ तामागतांसतीदृष्ट्वाजयामेकामुवाचह ॥ किमर्थंविजयानागाज्जयंतीचापरा
जिता ॥ ३ ॥ सादेव्यावचनंश्रुत्वाउवाचपरमेश्वरी ॥ गतानिमंत्रिताःसर्वामखेमातामहस्यताः ॥ ४ ॥ समंपित्रागौतमेनमात्राचैवाप्यह
ल्यया ॥ अहंसमागताद्रष्टुंत्वांतत्रगमनोत्सुका ॥ ५ ॥ किंत्वंनव्रजसेतत्रतथादेवोमहेश्वरः ॥ नामंत्रितासितातेनउताहोस्विद्व्रजिष्यसि ॥
॥ ६ ॥ गतास्तुऋषयःसर्वेऋषिपत्न्यस्तथासुराः ॥ मातृष्वसःशशांकश्चसपत्नीकोगतःक्रतुम् ॥ ७ ॥ चतुर्दशसुलोकेषुजंतवोयेचरा
चराः ॥ निमंत्रिताःक्रतौसर्वेकिंवात्वंननिमंत्रिता ॥ ८ ॥ पुलस्त्य उवाच ॥ जयायास्तद्वचःश्रुत्वावज्रपातोपमंसती ॥ मन्युनाभिप्लुताब्रह्म
न्पश्चत्वमगमत्तदा ॥ ९ ॥ जयामृतांसतींदृष्ट्वाक्रोधशोकपरिप्लुता ॥ मुंचतीवारिनेत्राभ्यांसुस्वरंविललापह ॥ १० ॥ आक्रंदितध्वनिंश्रुत्वा
शूलपाणिस्त्रिलोचनः ॥ आःकिमेतदितीत्युक्त्वाजयाभ्याशमुपागतः ॥ ११ ॥ आगतोदृदृशेदेवींलतामिववनस्पतेः ॥ कृत्तांपरशुनाभूमौ
श्लथांगींपतितांसतीम् ॥ १२ ॥ देवींनिपतितांदृष्ट्वाजयांपप्रच्छशंकरः ॥ किमियंपतिताभूमौनिकृत्तेवलतासती ॥ १३ ॥ साशंकरवचःश्रुत्वाज
यावचनमब्रवीत् ॥ श्रुत्वामखेचस्वावज्ञांभगिन्यःपतिभिःसह ॥ १४ ॥ आदित्यास्त्रिषुलोकेषुसमंशक्रादिभिःसुरैः ॥ मातृष्वसाविपन्नेयमं
तर्दुःखेनदह्यती ॥ १५ ॥ पुलस्त्य उवाच ॥ तच्छ्रुत्वाथवचोरौद्रंरुद्रः क्रोधाप्लुतोवभौ ॥ क्रुद्धस्यसर्वगात्रेभ्योनिश्चेरुःपावकार्चिषः ॥ १६ ॥ ततः
क्रोधात्त्रिनेत्रस्यगात्ररोमोद्भवामुने ॥ गणाःसिंहमुखाजातावीरभद्रपुरोगमाः ॥ १७ ॥ गणैःपरिवृतस्तस्मान्मंदराद्धिमसाह्वयम् ॥ ततः कन
खलंतस्माद्यत्रदक्षोऽयजत्क्रतुम् ॥ १८ ॥ ततोगणानामधिपोवीरभद्रोमहाबलः ॥ दिशिप्रत्युत्तरायांचतस्थौशूलधरोमुने ॥ १९ ॥ जया
क्रोधाद्गदांगृह्यपूर्वदक्षिणतःस्थिता ॥ मध्येत्रिशूलभृच्छर्वस्तस्थौक्रुद्धोमहाक्रतौ ॥ २० ॥ [illegible]
॥ ऋषयोदे

वत्परमादशणरुणाद्धशिमासहमारुतन ... चावलानां

वगंधर्वाःकिमिदंत्वित्यचिंतयन् ॥ २१ ॥ ततस्तुधनुरादायशरानाशीविषोपमान् ॥ द्वौरपालस्ततंदधभावीरभद्रंमुपागेथैवनाग्दे२ ॥ तमा
पतंतंसहसाधर्मंदृष्ट्वागणेश्वरः ॥ करेणैकेनजग्राहात्रिशूलंवज्रसन्निभम् ॥ २३ ॥ कार्मुकंचद्वितीयेनतृतीयेनाथमार्गणान् ॥ चतुर्थेनगदांगृह्य
धर्ममभ्यद्रवद्गणः ॥ २४ ॥ ततश्चतुर्भुजंदृष्ट्वाधर्मराजोगणेश्वरम् ॥ तस्थावष्टभुजोभूत्वानानायुधधरोव्ययः ॥ २५ ॥ खड्गचर्म्मगदाप्रासप
रश्वधवरांकुशैः ॥ चापमार्गणभृत्तस्थौहंतुकामोगणेश्वरम् ॥ २६ ॥ गणेश्वरोपिसंक्रुद्धोहंतुंधर्म्मंसनातनम् ॥ ववर्षमार्गणांस्तीक्ष्णान्यथा
प्रावृषितोयदः ॥ २७ ॥ तावन्योन्यंमहात्मानौशरचापधरौमुने ॥ रुधिरारुणसिक्तांगौकिंशुकाविवरेजतुः ॥ २८ ॥ मृधेवरास्त्रैर्गणनायकेन
जितःसधर्मस्तरसाप्रसह्य ॥ पराङ्मुखोभूद्विमनामुनींद्रसवीरभद्रःप्रविवेशयज्ञम् ॥ २९ ॥ यज्ञवाटंप्रविष्टंतुवीरभद्रंगणेश्वरम् ॥ दृष्ट्वातुसह
सादेवाउत्तस्थुःसायुधामुने ॥ ३० ॥ वसवोऽष्टौमहाभागाग्रहानवसुदारुणाः ॥ इंद्राद्याद्वादशादित्या रुद्रास्त्वेकादशैवहि ॥ ३१ ॥ विश्वे
देवाश्चसाध्याश्चसिद्धगंधर्वपन्नगाः ॥ यक्षाःकिंपुरुषाभूताःखगाश्चक्रधरास्तथा ॥३२॥ नृपावैवस्वताद्वंशाद्विविधायेचविश्रुताः ॥ सोमवंशोद्ध
वाश्चान्येभोजकीर्तिमहीभुजः ॥ ३३ ॥ दितिजादानवाश्चान्येयेऽन्येतत्रसमागताः ॥ तेसर्वेऽप्यद्रवन्रौद्रंवीरभद्रमुदायुधाः ॥ ३४ ॥ तानापत
तएवाशुबाणचापधरोगणः ॥ अभिदुद्राववेगेनसर्वानेवशरोत्करैः ॥ ३५ ॥ तेशस्त्रवर्षमतुलंगणेशायसमुत्सृजन् ॥ गणेशोपिवरास्त्रैस्तांश्चि
च्छेदचबिभेदच ॥ ३६ ॥ शरैःशस्त्रैश्चसततंवध्यमानामहात्मना ॥ वीरभद्रेणदेवाद्यास्त्ववहारमरोचयन् ॥ ३७ ॥ ततोविवेशगणपोयज्ञम
ध्यंसुविस्तृतम् ॥ जुह्वानाऋषयोयत्रहवींषिप्रत्यवंधत ॥ ३८ ॥ ततोमहर्षयोदृष्ट्वामृगेंद्रवदनंगणम् ॥ भीताहोत्रंपरित्यज्यजग्मुःशरणमच्यु
तम् ॥ ३९ ॥ तानार्तांश्चक्रभृद्दृष्ट्वामहर्षींस्त्रस्तमानसान् ॥ नभेतव्यमितीत्युक्त्वासमुत्तस्थौवरायुधः ॥ ४० ॥ समानम्यततःशार्ङ्गंशराना

शीविषोपमान् ॥ मुमोचवीरभद्रायकायावरणदारणान् ॥ ४१ ॥ तेतस्यकायमासाद्यअमोघावैहरेःशराः ॥ निपेतुर्भुविभग्नाशानास्तिका
दिवयाचकाः ॥ ४२ ॥ शरांस्त्वमोघान्मोघत्वमापन्नान्वीक्ष्यकेशवः ॥ दिव्यैरस्त्रैर्वीरभद्रंप्रच्छादयितुमुद्यतः ॥ ४३ ॥ तानस्त्रान्वासुदेवेन
प्रक्षिप्तान्गणनायकः ॥ वारयामासशूलेनगदयामार्गणैस्तथा ॥ ४४ ॥ दृष्ट्वाविपन्नान्यस्त्राणिगदांचिक्षेपमाधव ॥ त्रिशूलेनसमाहत्यपात
यामास भूतले ॥ ४५ ॥ तांगदांविफलांदृष्ट्वालांगलंप्राक्षिपद्धरिः ॥ लांगलंचगणेशोऽपिगदयाप्रत्यवारयत् ॥ ४६ ॥ मुसलंवीरभद्रायसंचि
क्षेपहलायुधः ॥ पूर्ववन्मुसलाघातंवीरभद्रोन्यवारयत् ॥ ४७ ॥ मुसलंसंहतंदृष्ट्वालांगलंचनिवारितम् ॥ वीरभद्रायचिक्षेपचक्रंक्रोधात्खग
ध्वजः ॥ ४८ ॥ तमापतंतंशतसूर्यकल्पंसुदर्शनंप्रेक्ष्यगणेश्वरस्तु ॥ शूलंपरित्यज्यजगारचक्रंतथामधुंमीनवपुःसुरेंद्रः ॥ ४९ ॥ चक्रेनिगीर्णे
गणनायकेनक्रोधातिरक्तोऽसितचारुनेत्रः ॥ मुरारिरभ्येत्यगणाधिपेंद्रमुत्क्षिप्यवेगाद्भुविनिष्पिपेष ॥ ५० ॥ हरिबाहूरुवेगेनविनिष्पिष्टस्य
भूतले ॥ सहितंरुधिरोद्गारैर्मुखाच्चक्रंविनिर्गतम् ॥ ५१ ॥ ततोनिःसृतमालोक्यचक्रंकैटभनाशनः ॥ समादायहृषीकेशोवीरभद्रंमुमोचह ॥
॥ ५२ ॥ हृषीकेशेनमुक्तस्तुवीरभद्रोजटाधरम् ॥ गत्वानिवेदयामासवासुदेवात्पराजयम् ॥५३॥ ततोजटाधरोदृष्ट्वागणेशंशोणिताप्लुतम्॥
निश्वसंतंयथानागंक्रोधंचक्रेतदाव्ययः ॥५४॥ ततःक्रोधाभिभूतेनवीरभद्रोऽथशंभुना ॥ पूर्वोद्दिष्टेतदास्थानेसायुधस्तुनिवेशितः ॥५५॥ वीर
भद्रमथादिश्यभद्रकालीचशंकरः॥ विवेशक्रोधताम्राक्षोयज्ञवाटंत्रिशूलभृत् ॥५६॥ ततस्तुदेवप्रवरेजटाधरेत्रिशूलपाणौत्रिपुरांतकारिणि ॥
दक्षस्ययज्ञंविशतिक्षयंकरेजातोमुनीनांप्रवरोहिसाध्वसः ॥५७॥ इतिश्रीवामनपुराणेपुलस्त्यनारदसंवादेहरललितोनामचतुर्थोऽध्यायः॥४॥
पुलस्त्य उवाच ॥ जटाधरंहरिर्दृष्ट्वाक्रोधादारक्तलोचनम् ॥ तस्मात्स्थानादपाक्रम्यकुब्जाम्रेंतर्हितःस्थितः ॥१॥ वसवोऽष्टौदरंदृष्ट्वाससृपुर्वै
[illegible]न्वयम् ॥ सौरेः[illegible]परमिदंकुंभोजंयेचविश्रुते ॥४१॥ [illegible]

गतोमुने ॥ सातुजातासरिच्छ्रेष्ठासीतानामसरस्वती ॥२॥ एकादशतथारुद्रास्त्रिनेत्रावृषकेतनाः ॥ कांदिशींकालयंजग्मुःसमभ्येत्याथशंकर
म् ॥३॥ विश्वेऽश्विनौचसाध्याश्चमरुतोऽनलभास्कराः ॥ समासाद्यपुरोडाशंभक्षयंतोमहामुने ॥४॥ चंद्रःसमंऋक्षगणैर्निशांसमुपदर्शयन् ॥
उत्पत्यारुह्यगगनंस्वमधिष्ठानमास्थितः ॥५॥ कश्यपाद्याश्चऋषयोजपंतःशतरुद्रियम् ॥ पुष्पांजलिपुटाभूत्वाप्रणताःसंस्थितामुने ॥ ६ ॥
असकृद्दक्षदयिताहृष्ट्वारुद्रंबलाधिकम् ॥ शक्रादीनांसुरेशानांकृपणंविललापह ॥७॥ ततःक्रोधाभिभूतेनशंकरेणमहात्मना ॥ तलप्रहारैरमरा
वहवोविनिपातिताः ॥८॥ पादप्रहारैरपरेत्रिशूलेनापरेमुने ॥ दृष्ट्वाग्निनातथैवान्येदेवाद्याःप्रलयंगताः ॥९॥ ततःपूषाहरंवीक्ष्यविनिघ्नंतंसुरासु
रान् ॥ क्रोधाद्बाहूप्रसार्याथप्रदुद्रावमहेश्वरम् ॥१०॥ तमापतंतंभगवान्संनिरीक्ष्यत्रिलोचनः ॥ वाहुभ्यांप्रतिजग्राहकरेणैकेनशंकरः॥११॥
कराभ्यांप्रगृहीतस्यशंभुनांशुमतोऽपिहि ॥ करांगुलिभ्योनिश्चेरुरसृग्धाराःसमंततः ॥ १२ ॥ ततोवेगेनमहताअंशुमंतंदिवाकरम् ॥
भ्रामयामाससततंसिंहोमृगशिशुंयथा ॥ १३ ॥ भ्रामितस्यातिवेगेननारदांशुमतोपिहि ॥ भुजौह्रस्वत्वमापन्नौत्रुटितस्नायुवंधनौ ॥
॥ १४ ॥ रुधिराप्लुतसर्वांगमंशुमंतंमहेश्वरः ॥ सन्निरीक्ष्योत्ससर्जैनमन्यतोभिजगामह ॥ १५ ॥ ततस्तुपूषाविहसन्दशनान्निदर्शयन् ॥
प्रोवाचैह्येहिकापालिन्पुनःपुनरपीश्वरम् ॥ १६ ॥ ततःक्रोधाभिभूतेनपूष्णोवेगेनशंभुना ॥ मुष्टिनाऽऽहत्यदशनाःपातिताधरणीतले ॥१७॥
भग्नदंतस्तथापूषारुधिराभिप्लुताननः ॥ पपातभुविनिःसंज्ञोवज्राहतइवाचलः ॥ १८ ॥ भगोऽपिवीक्ष्यपतितंपूषणंरुधिरोक्षितम् ॥ नेत्रा
भ्यांघोररूपाभ्यांवृषभध्वजमैक्षत ॥ १९ ॥ त्रिपुरघ्नस्ततःक्रुद्धस्तलेनाहत्यचक्षुषी ॥ निपातयामासभुविक्षोभयन्सर्वदेवताः ॥२० ॥ततो
दिवाकराःसर्वेपुरस्कृत्यशतक्रतुम् ॥ मरुद्भिश्चहुताशैश्चभयाज्जग्मुर्दिशोदश ॥ २१ ॥ प्रतियातेषुदेवेषुप्रह्लादाद्यादितीश्वराः ॥ नमस्कृत्य

ततःसर्वैतस्थुःप्रांजलयोमुने ॥ २२ ॥ ततस्तंयज्ञवाटंतुशंकरोघोरचक्षुषा ॥ ददर्शदग्धुंकोपेनसर्वांश्चैवसुरासुरान् ॥ २३ ॥ ततोनिलि
ल्यिरेवीराःप्रणेमुर्दुद्रुवुस्तथा ॥ भयादन्येहरंदृष्ट्वागतावैवस्वतक्षयम् ॥ २४ ॥ ततोऽग्नयस्त्रिभिर्नेत्रैर्दुःसमंसमवैक्षत ॥ दृष्टमात्रास्त्रिनेत्रेणभ
स्मीभूताभवन्क्षणात् ॥ २५ ॥ अग्नौप्रणष्टेयज्ञोपिभूत्वादिव्यवपुर्मृगः ॥ दुद्रावविक्लवगतिर्दक्षिणासहितोऽम्बरे ॥ २६ ॥ तमेवानुससारेशश्चा
पमानम्यवेगवान् ॥ शरंपाशुपतंकृत्वाकालरूपीमहेश्वरः ॥ २७ ॥ अर्द्धेनयज्ञवाटान्तेजटाधरइतिश्रुतः ॥ अर्द्धेनगगनेशर्वःकालरूपीचक
थ्यते ॥ २८ ॥ नारद उवाच ॥ कालरूपीत्वयाख्यातःशंभुर्गगनगोचरः ॥ लक्षणंचस्वरूपं च सर्वंव्याख्यातुमर्हसि ॥ २९ ॥ पुलस्त्य
उवाच ॥ स्वरूपंत्रिपुरघ्नस्यवदिष्येकालरूपिणः ॥ येनांबरंमुनिश्रेष्ठव्याप्तं लोकहितेप्सुना ॥ ३० ॥ यत्राश्विनीचभरणीकृत्तिकायास्तथां
शकः ॥ मेषोराशिःकुजक्षेत्रंतच्छिरःकालरूपिणः ॥ ३१ ॥ आग्नेयांशास्त्रयोब्रह्मन्प्राजापत्यंकवेर्गृहम् ॥ सौम्यार्द्धंवृषनामेदंवदनंपरिकीर्त्ति
तम् ॥ ३२ ॥ मृगार्धमार्द्राऽदित्यांशास्त्रयःसौम्यगृहंत्विदम् ॥ मिथुनंभुजयोस्तस्यगगनस्थस्यशूलिनः ॥३३॥ आदित्यांशश्चपुष्यंचआश्ले
षाशशिनोगृहम् ॥ राशिःकर्कटकोनामपार्श्वेमखविनाशिनः ॥३४॥ पित्र्यर्क्षंभगदैवत्यमुत्तरांशश्चकेसरी ॥ सूर्यक्षेत्रंविभोर्ब्रह्मन्हृदयं परिगी
यते ॥३५॥ उत्तरांशास्त्रयःपाणिश्चित्रार्द्धंकन्यकात्विदम् ॥ सोमपुत्रस्यसद्मैतद्द्वितीयंजठरंविभोः ॥ ३६ ॥ चित्रांशद्वितयंस्वातिर्विशाखायां
शकत्रयम् ॥ द्वितीयंशुक्रसदनंतुलानाभिरुदाहृता ॥ ३७ ॥ विशाखांशमनुराधाज्येष्ठाभौमगृहंत्विदम् ॥ द्वितीयंवृश्चिकोराशिर्मेढ्रंकालस्व
रूपिणः ॥ ३८ ॥ मूलंपूर्वोत्तरांशश्चदेवाचार्यगृहंधनुः ॥ ऊर्वोर्युगलमीशस्यअपरार्द्धंप्रगीयते ॥३९॥ उत्तरांशास्त्रयश्चर्क्षंश्रवणंमकरोमुने ॥
धनिष्ठार्द्धंशनिक्षेत्रंजानुनीपरिकीर्त्तिते ॥४०॥ धनिष्ठार्धंशतभिषाप्रोष्ठपादांशकत्रयम् ॥ सौरेः[illegible]परमिदंकुंभोजंघेचविश्रुते ॥४१॥ प्रोष्ठ

पादांशमेकंतुउत्तरारेवतीतथा ॥ द्वितीयंजीवसदनंमीनस्तौचरणावुभौ ॥४२॥ एवंकृत्वाकालरूपात्रिनेत्रोयज्ञंक्रोधान्मार्गणैराजघान ॥ विद्ध
श्चासौवेदनाबुद्धिमुक्तःखेसंतस्थौतारकाभिश्चितांगः ॥४३॥ नारदउवाच॥राशयःकथिताब्रह्मंस्त्वयाद्वादशवैमम॥तेषांविस्तरतोब्रूहिलक्षणा
निस्वरूपतः ॥४४॥ पुलस्त्य उवाच ॥ स्वरूपंतववक्ष्यामिराशीनांशृणुनारद ॥ यादृशायत्रसंचारायस्मिन्स्थानेवसंतिच ॥४५॥ संचरस्था
नमेवास्यधान्यरत्नाकरादिषु ॥ नवशाड्वलसंछन्नवसुधायांचसर्वशः ॥ ४६ ॥ नित्यंचरतिफुल्लेषुसरसांपुलिनेषुच ॥ मेषःसमानमूर्त्ति
श्चअजाविकधनादिषु ॥ ४७ ॥ वृषःसदृशरूपेषुचरतेगोकुलादिषु ॥ तस्याधिवासभूमिस्तुकृपीवलधराश्रयः ॥ ४८ ॥ स्त्रीपुंसयोःसमंरूपं
शय्यासनपरिग्रहम् ॥ वीणावाद्यधृङ्मिथुनंगीतनर्त्तनशिल्पिषु ॥ ४९ ॥ स्थितंक्रीडारतिर्नित्यंविहारंध्वनिकस्यतु ॥ मिथुनंनामविख्यातं
राशिर्द्वैधात्मकःशिवः ॥ ५० ॥ कर्किःकुलीरेणसमःसलिलस्थःप्रकीर्त्तितः ॥ केदारवापीपुलिनविविक्तावनिरेवच ॥ ५१ ॥ सिंहस्तुपर्व
तारण्यदुर्गकंदरभूमिषु ॥ वसतेव्याधपल्लीषुगह्वरेषुगुहासुच ॥ ५२ ॥ व्रीहिप्रदीपिककराभावारूढाचकन्यका ॥ चरतेस्त्रीरतिस्थानेवसतेन
ड्वलेषुच ॥ ५३ ॥ तुलापाणिश्चपुरुषोवीथ्यापणविचारकः ॥ नगराध्वनिशालासुवसतेतत्रनारद ॥ ५४ ॥ श्वभ्रवल्मीकसंचारीवृश्चिकोवृश्चि
काकृतिः ॥ विषगोमयकीटादिपाषाणादिषुसंस्थितः ॥ ५५ ॥ धनुस्तुरंगजघनोदीप्यमानोधनुर्धरः ॥ वाजिशूरास्त्रविद्वीरःस्थायीगजरथा
दिषु ॥ ५६ ॥ मृगास्योमकरोनामवृषस्कंधेक्षणोगजः ॥ मकरोऽसौनदीचारीवसतेचमहोदधौ ॥ ५७ ॥ रिक्तकुंभश्चपुरुषःस्कंधचारीजला
प्लुतः ॥ द्यूतशालाचरःकुंभःस्थायीशौंडिकसद्मसु ॥ ५८ ॥ मीनद्वयमथासक्तंमीनस्तीर्थाब्धिसंचरः ॥ वसतेपुण्यदेशेषुदेवब्राह्मणसद्मसु ॥
॥ ५९ ॥ लक्षणागदितास्तुभ्यंमेषादीनांमहामुने ॥ नकस्यचित्त्वयाख्येयंगुह्यमेतत्पुरातनम् ॥ ६० ॥ एतन्मयातेकथितंसुरर्षेयथात्रिनेत्रः

प्रममंथयज्ञम् ॥ पुण्यंपुराणंपरमंपवित्रमाख्यातवान्पापहरंशिवंच ॥ ६१ ॥ इतिश्रीवामनपुराणेहरललितोनामपंचमोध्यायः ॥ ५ ॥ ॥
पुलस्त्यउवाच ॥ बह्वृचोब्राह्मणोयोसौधर्मोदिव्यवपुःसदा ॥ तस्यभार्यात्वहिंसाचतस्यामजनयत्सुतान् ॥ १ ॥ हरिंकृष्णंचदेवर्षेनरनारा
यणौतथा ॥ योगाभ्यासरतौनित्यंहरिकृष्णौबभूवतुः ॥ २ ॥ नरनारायणौचैवजगतोहितकाम्यया ॥ तप्येतांचतपःसौम्यौपुराणऋषिस
त्तमौ ॥ ३ ॥ प्रालेयाद्रिसमागम्यतीर्थेबदरिकाश्रमे ॥ गृणंतौतत्परंब्रह्मगंगायाविपुलेतटे ॥ ४ ॥ नरनारायणाभ्यांचजगदेतच्चराचरम् ॥
तापितंतपसाब्रह्मन्संक्षोभंपरमंययौ ॥ ५ ॥ संक्षुब्धस्तपसाताभ्यांक्षोभणायशतक्रतुः ॥ रंभामप्सरसांश्रेष्ठांप्रेषयत्समहाश्रमम् ॥ ६ ॥ कंद
र्पश्चसुदुर्धर्षश्चूतांकुरमहायुधः ॥ समंसहचरेणैववसंतेनाशुसंगतः ॥ ७ ॥ ततोमाधवकंदर्पौसाचैवाप्सरसांवरा ॥ बदर्याश्रममागम्यविचिक्री
डुर्यथेच्छया ॥ ८ ॥ ततोवसंतेसंप्राप्तेकिंशुकाज्वलनप्रभाः ॥ निष्पत्राःसततंरेजुःशोभयंतोधरातलम् ॥ ९ ॥ शिशिरंनाममातंगंविदार्यन
खरैरिव ॥ वसंतकेसरीप्राप्तःपलाशकुसुमैर्मुने ॥ १० ॥ मयातुषारैश्चकरीनिर्जितःस्वेनतेजसा ॥ तमेवमहसच्छोभैर्वसंतःकुंदकुड्मलैः ॥ ११ ॥
वनानिकर्णिकाराणांपुष्पितानिविरेजिरे ॥ यथानरेंद्रपत्राणिकनकाभरणानिवै ॥ १२ ॥ तेषामनुतथानीपाःकिंकराइवरेजिरे ॥ स्वामिसंल
ब्धसंमानाभृत्याराजसुताइव ॥ १३ ॥ रक्ताशोकवनाभांतिपुष्पिताःसहसोज्ज्वलाः ॥ भृत्यावसंतनृपतेःसंग्रामासृक्क्षताइव ॥ १४ ॥ भृंग
वृंदापिंजरिताराजंतेगहनेवने ॥ पुलकाभिवृतायद्वत्सज्जनाःसुहृदागमे ॥ १५ ॥ मंजरीभिर्विराजंतेनदीकूलेषुवेतसाः ॥ वक्तुकामाइवांगु
ल्याकोऽस्माकंसदृशोनगः ॥ १६ ॥ रक्ताशोककरातन्वीदेवर्षेकिंशुकांघ्रिका ॥ नीलाशोककचश्यामाविकासिकमलानना ॥ १७ ॥
नीलेंदीवरनेत्राचब्रह्मन्बिल्वफलस्तनी ॥ प्रोत्फुल्लकुंददशनामंजरीकरशोभिता ॥ १८ ॥ बंधुजीवाधराशुभ्रसिंदुवारनखांकुरा ॥ पुंस्को

किलस्वनादिव्याकंकोलवसनाशुभा ॥ १९ ॥ वर्हिवृंदकलापाचसारसस्वरनूपुरा ॥ प्राग्वंशरसनाब्रह्मन्मत्तहंसगतिस्तथा ॥ २० ॥
पुत्रजीवांशुकासंगरोमराजिविराजिता ॥ वसंतलक्ष्मीःसंप्राप्तातस्मिन्बदरिकाश्रमे ॥ २१ ॥ ततोनारायणोदृष्ट्वाआश्रमस्यानवद्यताम् ॥
समीक्ष्यसदिशःसर्वास्ततोऽनंगमपश्यत ॥ २२ ॥ नारदउवाच ॥ कोऽसावनंगोब्रह्मर्षेतस्मिन्बदरिकाश्रमे ॥ यंददर्शजगन्नाथोदेवोनारायणो
ऽव्ययः ॥ २३ ॥ पुलस्त्य उवाच ॥ कंदर्पोहर्षतनयोयोऽसौकामोनिगद्यते ॥ सशंकरेणसंदग्धोह्यनंगत्वमुपागतः ॥ २४ ॥ नारद उवाच ॥
किमर्थंकामदेवोसौदेवदेवेनशंभुना ॥ दग्धश्चकारणेकस्मिन्नेतद्व्याख्यातुमर्हसि ॥ २५ ॥ पुलस्त्य उवाच ॥ यदादक्षसुताब्रह्मन्सतीयाता
यमक्षयम् ॥ विनाश्यदक्षयज्ञंतंविचचारत्रिलोचनः ॥ २६ ॥ ततोवृषध्वजंदृष्ट्वाकंदर्पःकुसुमायुधः ॥ अपत्नीकंतदास्त्रेण उन्मादेनाभ्यताड
यत् ॥ २७ ॥ ततोहरःशरेणाथउन्मादेनाशुताडितः ॥ विचचारततोन्मत्तःकाननानिसरांसिच ॥ २८ ॥ स्मरन्सतींमहादेवस्तथोन्मादेन
ताडितः ॥ नशर्मलेभेदेवर्षेबाणविद्धइवद्विपः ॥ २९ ॥ ततःपपातदेवेशःकालिंदीसरितंमुने ॥ निमग्नेशंकरेचापोदग्धाःकृष्णत्वमागताः ॥
॥ ३० ॥ तदाप्रभृतिकालिंद्याभृंगांजननिभंजलम् ॥ आस्यंदत्पुण्यतीर्थासाकेशपाशइवावनेः ॥ ३१ ॥ ततोनदीषुपुण्यासुसरस्सुचसरि
त्सुच ॥ पुलिनेषुचरम्येषुवापीषुनलिनीषुच ॥ ३२ ॥ पर्वतेषुचरम्येषुकाननेषुचसानुषु ॥ विचरन्स्वेच्छयानैवशर्मलेभेमहेश्वरः ॥ ३३ ॥
क्षणंगायतिदेवर्षेक्षणंरोदितिशंकरः ॥ क्षणंध्यायतितन्वंगींदक्षकन्यांमनोरमाम् ॥ ३४ ॥ ध्यात्वाक्षणंस्वपितिचक्षणंस्वप्नायतेहरः ॥ स्वप्ने
तथेदंगदतिदृष्ट्वादक्षस्यकन्यकाम् ॥ ३५ ॥ निर्घृणेतिष्ठकिंमूढेत्यजसेमामनिंदिते ॥ मुग्धेत्वयाविरहितोदग्धोस्मिमदनाग्निना ॥३६॥ सत्यं
प्रकुपितादेविमाकोपंकुरुसुंदरि ॥ पादप्रणामावनतमभिभाषितुमर्हसि ॥ ३७ ॥ श्रूयसेदृश्यसेनित्यंस्पृश्यसेवंद्यसेप्रिये ॥ आलिंग्यसेचस

ततंकिमर्थंनाभिभाषसे ॥ ३८ ॥ विलपंतंजनं दृष्ट्वाकृपाकस्यनजायते ॥ विशेषतःपतिंवालेननुत्वमतिनिर्घृणा ॥ ३९ ॥ त्वयोक्तानिव
चांस्येवंपूर्वममकृशोदरि ॥ त्वयाविनानजीवेयंतदसत्यंत्वयाकृतम् ॥ ४० ॥ एह्येहिकामसंतप्तंपरिष्वजसुलोचने ॥ नान्यथानश्यतेताप:
सत्येनापि शपेप्रिये ॥ ४१ ॥ इत्थंविलप्यस्वप्नांतेप्रतिवुद्धस्तुतत्क्षणात् ॥ उत्कूजतितथारण्येमुक्तकंठंपुनःपुनः ॥ ४२ ॥ तंकूजमानंविल
पंतमारात्समीक्ष्यकामोवृषकेतनंहि ॥ विव्याधचापंतरसाविनाम्यसंतापनाम्नासुशरेणभूयः ॥ ४३ ॥ संतापनास्त्रेणतदासविद्धोभूयःससंत
प्ततरोवभूव ॥ संतापयंश्चापिजगत्समस्तंफूत्कृत्यफूत्कृत्यविवाशतेस्म ॥ ४४ ॥ तंचापिभूयोमदनोजघानविजृंभणास्त्रेणततोविजृंभे ॥
ततोभृशंकामशरैर्वितुन्नोविजृंभमाणःपरितोभ्रमंश्च ॥ ४५ ॥ ददर्शयक्षाधिपतेस्तनूजंपांचालिकंनामजगत्प्रधानम् ॥ दृष्ट्वात्रिनेत्रोधनदस्य
पुत्रंपार्श्वंसमभ्येत्यवचोवभाषे ॥ भ्रातृव्यवक्ष्यामिवचोयदद्यतत्त्वंकुरुष्वामितविक्रमोसि ॥ ४६ ॥ पांचालिक उवाच ॥ यन्नाथमांवक्ष्य
सितत्करिष्येसुदुष्करंयद्यपिदेवसंघैः ॥ आज्ञापयस्वातुलवीर्यशंभोदासोस्मितेभक्तियुतस्तथेश ॥ ४७ ॥ ईश्वर उवाच ॥ नाशंगतायांवरदां
विकायां कामाग्निनाप्लुष्टसुविग्रहोस्मि ॥ विजृंभणोन्मादशरैर्विभिन्नोधृतिंनविंदामिरतिंसुखंच ॥ ४८ ॥ विजृंभणंपुत्रतथैवतापमुन्मादमु
ग्रंमदनप्रणुन्नम् ॥ नान्यःपुमान्धारयितुंहिशक्तोमुक्त्वाभवंतंहिततःप्रतीच्छ ॥ ४९ ॥ पुलस्त्य उवाच ॥ इत्येवमुक्तोवृषभध्वजेनयक्षःप्रती
च्छन्सविजृंभणादीन् ॥ तोषंजगामाशुततस्त्रिशूलीतुष्टस्तदैवंवचनंबभाषे ॥ ५० ॥ हर उवाच ॥ यस्मात्त्वयापुत्रसुदुर्धराणिविजृंभणादीनि
प्रतीच्छितानि ॥ तस्माद्वरंत्वांप्रतिपूजनायदास्यामिलोकस्यचहास्यकारी ॥ ५१ ॥ यस्त्वांयदापश्यतिचैत्रमासेस्पृशेन्नरोवार्चयतेचभक्त्या ॥
वृद्धोऽथवालोऽथयुवाथयोषित्सर्वेतदोन्मादधराभवंति ॥ ५२ ॥ गायंतिनृत्यंतिरमंतियक्षवाद्यानियत्नादपिवादयंति ॥ तवाग्रतोहास्यवचो

२

भिरक्ताभवंतितेयोगयुतास्तुतेस्युः ॥ ५३ ॥ ममैवनाम्नाभवितासिपूज्यःपांचालिकेशःप्रथितःपृथिव्याम् ॥ ममप्रसादाद्वरदोनराणांभविष्य
सेपूज्यतमोभिगच्छ ॥ ५४ ॥ इत्येवमुक्तोविभुनासयक्षोजगामदेशान्सहसैवसर्वान् ॥ कालंजरस्योत्तरतःसुपुण्योदेशोहिमाद्रेरपिदक्षिणस्थः
॥ ५५ ॥ तस्मिन्सुपुण्येविषयेनिविष्टोरुद्रप्रसादादपिपूज्यतेऽसौ ॥ तस्मिन्प्रयातेभगवांस्त्रिनेत्रोदेवोपिविंध्यंगिरिमभ्यगच्छत् ॥ ५६ ॥
तत्रापिमदनोगत्वाददर्शवृषकेतनम् ॥ दृष्ट्वाप्रहर्त्तुकामश्चततःप्राद्रुद्रुवेहरः ॥ ५७ ॥ ततोदारुवनंघोरंमदनाभिसृतोहरः॥ विवेशऋषयोयत्रस
पत्नीकाव्यवस्थिताः ॥ ५८ ॥ तेचापिऋषयःसर्वेदृष्ट्वामूर्ध्नांनताभवन् ॥ ततस्तान्प्राहभगवान्भिक्षामेप्रतिदीयताम् ॥ ५९ ॥ ततस्तेमौनिन
स्तस्थुःसर्वएवमहर्षयः ॥ तदाश्रमाणिपुण्यानिपरिचक्रामनारद ॥ ६० ॥ तंप्रविष्टंतदादृष्ट्वाभार्गवात्रेययोषितः ॥ प्रक्षोभमगमन्सर्वाहीनस
त्वाःसमंततः ॥ ६१ ॥ ऋतेत्वरुंधतीमेकामनसूयांचभामिनीम् ॥ एतयोर्भर्तृपूजासुतच्चिन्तासुस्थितंमनः ॥ ६२ ॥ ततःसंक्षोभिताःसर्वा
यत्रायातिमहेश्वरः ॥ तत्रप्रयांतिकामार्त्तामदविह्वलितेंद्रियाः ॥ ६३ ॥ त्यक्त्वाश्रमाणिशून्यानिस्वानितामुनियोषितः ॥ अनुजग्मुर्यथा
मत्तंकरिण्यइवकुंजरम् ॥ ६४ ॥ ततस्तुऋषयोदृष्ट्वाभार्गवांगिरसोमुने ॥ क्रोधान्विताब्रुवन्सर्वेलिंगमापततांभुवि ॥ ६५ ॥ ततःपपातदेव
स्यलिंगंपृथ्वींविदारयत् ॥ अंतर्द्धानंजगामाथत्रिशूलीनीललोहितः ॥ ६६ ॥ ततस्तत्पतितंलिंगंविभेद्यवसुधातलम् ॥ रसातलंविवेशाथ
ब्रह्मांडंचोर्ध्वतोभिनत् ॥ ६७ ॥ ततश्चचालपृथिवीगिरयःसरितोनगाः ॥ पातालभुवनाःसर्वेजंगमाजंगमाश्रिताः ॥ ६८ ॥ संक्षुब्धान्भुवना
न्दृष्ट्वाभूर्लोकादीन्पितामहः ॥ जगाममाधवंद्रष्टुंक्षीरोदंनामसागरम् ॥ ६९ ॥ तत्रदृष्ट्वाहृषीकेशंप्रणिपत्यचभक्तितः ॥ उवाचदेवभुवनाःकिम
र्थंक्षुभिताविभो ॥७०॥ अथोवाचहरिर्ब्रह्मच्छार्वोलिंगोमहर्षिभिः ॥ पातितस्तस्यभारार्तासंचचालवसुंधरा ॥ ७१ ॥ ततस्तदद्भुततमंश्रुत्वा

देवःपितामहः ॥ तत्रगच्छामदेवेशएवमाहपुनःपुनः ॥ ७२ ॥ ततःपितामहोदेवःकेशवश्चजगत्पतिः ॥ आजग्मतुस्तमुद्देशंयत्रलिंगंभवस्य
तत् ॥ ७३ ॥ ततोऽनंतंहरिर्लिंगंदृष्ट्वारुह्यखगेश्वरम् ॥ पातालंप्रविवेशाथविस्मयांतरितोविभुः ॥ ७४ ॥ ब्रह्माहंसविमानेनऊर्ध्वमाक्रम्यस
र्वतः ॥ नैवांतमलभद्ब्रह्माविस्मितःपुनरागतः ॥७५॥ विष्णुर्गत्वाथपातालान्सप्तलोकपरायणः ॥ चक्रपाणिर्विनिष्क्रांतोलेभेऽतंनमहामुने ॥
॥ ७६ ॥ विष्णुःपितामहश्चोभौहरलिंगंसमेत्यह ॥ कृतांजलिपुटौभूत्वास्तोत्रंदेवौप्रचक्रतुः ॥ ७७ ॥ हरिब्रह्माणावूचतुः ॥ नमोस्तुते
शूलपाणेनमोस्तुवृषभध्वज ॥ जीमूतवाहनकवेशर्वत्र्यंबकशंकर ॥ ७८ ॥ महेश्वरमहेशानसुवर्णाक्षवृषाकपे ॥ दक्षयज्ञक्षयकरकालरूप
नमोस्तुते ॥ ७९ ॥ त्वमादिरस्यजगतस्त्वंमध्यंपरमेश्वर ॥ भवानंतश्चभगवान्सर्वगस्त्वंनमोस्तुते ॥ ८० ॥ पुलस्त्यउवाच ॥ एवंसंस्तूय
मानस्तुतस्मिन्दारुवनेहरः ॥ स्वरूपीताविदंवाक्यमुवाचवदतांवरः ॥ ८१ ॥ हरउवाच ॥ किमर्थंदेवतानाथौपरिभूतक्रमंत्विह ॥ मांस्तु
वातेभृशास्वस्थंकामतापितविग्रहम् ॥ ८२ ॥ देवावूचतुः ॥ भवतःपातितंलिंगंयदेतद्भुविशंकर ॥ एतत्प्रगृह्यतांभूयःअतोदेववदावहे ॥
॥ ८३ ॥ हर उवाच ॥ यद्यर्चयंतित्रिदशाममलिंगंसुरोत्तमौ ॥ तदेतत्प्रतिगृह्णीयांनान्यथेतिकथंचन ॥८४॥ ततःप्रोवाचभगवानेवमस्त्विति
केशवः ॥ ब्रह्मास्वयंचजग्राहलिंगंकनकपिंगलम् ॥८५॥ ततश्चकारभगवांश्चातुर्वर्ण्यंहरार्चने ॥ शास्त्राणिचैषांमुख्यानिनानोक्तविदितानिच
॥ ८६ ॥ आद्यंशैवंपरिख्यातमन्यत्पाशुपतंमुने ॥ तृतीयंकालदमनंचतुर्थंचकपालिकम् ॥ ८७ ॥ शिवश्चासीत्स्वयंशक्तिर्वसिष्ठस्यप्रियः
सुतः ॥ तस्यशिष्योबभूवाथगोपायनइतिश्रुतः ॥ ८८ ॥ महापाशुपतश्चासीद्भरद्वाजस्तपोधनः ॥ तस्यशिष्योप्यभूद्राजाऋषभःसोमके
श्वरः ॥ ८९ ॥ कालास्योभगवानासीदापस्तंबस्तपोधनः ॥ तस्यशिष्योबभूवाथनाम्नाक्राथेश्वरोमुने ॥ ९० ॥ महाव्रतीचधनदस्तस्याशि

१ शक्तिनामा वसिष्ठस्य सुतः स्वयंशिवोबभूवेत्यर्थः ।

ष्यश्चवीर्यवान् ॥ अर्णोदरइतिख्यातोजात्याशूद्रोमहातपाः ॥ ९१ ॥ एवंसभगवान्ब्रह्मापूजनायशिवस्यतत् ॥ कृत्वातुचातुराश्रम्यंस्वमेव
भवनंगतः ॥ ९२ ॥ गतेब्रह्मणिशर्वोपिउपसंहृत्यतत्तदा ॥ लिंगंचित्रवनेसूक्ष्मंप्रतिष्ठाप्यचचारह ॥ ९३ ॥ विचरंतंतदाभूयोमहेशंकुसुमा
युधः ॥ आरात्स्थित्वाग्रतोधन्वीसंतापयितुमुद्यतः ॥ ९४ ॥ ततस्तमग्रतोदृष्ट्वाक्रोधाध्मातदृशाहरः ॥ स्मरमालोकयामासशिखाग्राचर
णांतिकम् ॥ ९५ ॥ आलोकितस्त्रिनेत्रेणमदनोद्युतिमानपि ॥ प्रादह्यततदाब्रह्मन्पादादारभ्यकक्षवत् ॥ ९६ ॥ प्रदह्यमानौचरणौदृष्ट्वा
सौकुसुमायुधः ॥ उत्ससर्जधनुःश्रेष्ठंतज्जगामाथपंचधा ॥ ९७ ॥ यदासीन्मुष्टिबंधेतद्रुक्मपृष्ठंमहाप्रभम् ॥ सचम्पकतरुर्जातःसुगंधाढ्योम
हाद्युतिः ॥ ९८ ॥ नाभिस्थानंशुभाकारंयदासीद्वज्रभूषितम् ॥ तज्जातंकेसरारण्यंबकुलंनामतोमुने ॥ ९९ ॥ याचकोटीशुभाह्यासीदिंद्र
नीलविभूषिता ॥ जातासापाटलारम्याभृंगराजिविभूषिता ॥ १०० ॥ नाहोपरितथामुष्टौस्थानंचंद्रमणिप्रभम् ॥ पंचगुल्माभवज्जातीशशां
ककिरणोज्ज्वला ॥ १०१ ॥ ऊर्द्ध्वंमुष्ट्याअधःकोटयोःस्थानंविद्रुमभूषितम् ॥ तस्माद्बहुपुटामल्लीसंजाताविविधामुने ॥ १०२ ॥ पुष्पोप
गानिरम्याणिसुरभीणिचनारद ॥ जातियुक्तानिदेवेनस्वयमाचरितानिच ॥१०३॥ मुमोचमार्गणान्रम्याञ्छरीरेदह्यतिस्मरः ॥ फलोपगानिवृ
क्षाणिसंभूतानिसहस्रशः॥१०४॥चूतादीनिसुगंधीनिस्वादूनिविविधानिच ॥ हरप्रसादाज्जातानिभोज्यान्यपिसुरोत्तमैः ॥१०५॥ एवंदग्ध्वा
स्मरंरुद्रःसंयम्यस्वतनुंविभुः ॥ पुण्यार्थीशिशिराद्रिंसजगामतपसेऽव्ययः ॥१०६॥एवंपुरादेववरेणशंभुनाकामस्तुदग्धःसशरःसचापः॥तत
स्त्वनंगेतिमहाधनुर्द्धरोदेवैःस्तुतोदेववरैस्तुपूजितः ॥ १०७ ॥ इतिश्रीवामनपुराणेपुलस्त्यनारदसंवादेवामनप्रादुर्भावेकामदाहोनामषष्टो ॥१०॥
ऽध्यायः ॥ ६ ॥ पुलस्त्यउवाच ॥ ततोऽनंगंविभुर्दृष्ट्वाब्रह्मन्नारायणोमुनिः ॥ विहस्यैवंवचःप्राहकंदर्पइहआस्यताम् ॥ १ ॥ तदक्षुब्धत्वमी

क्ष्यास्यकामोविस्मयमागतः ॥ वसंतोपिमहाचिंतांजगामाशुमहामुने ॥२॥ ततश्चाप्सरसोदृष्ट्वास्वागतेनाभिपूज्यच ॥ वसंतमाहभगवानेह्ये
हिस्थीयतामितः ॥ ३ ॥ ततोविहस्यभगवान्मंजरींकुसुमावृताम् ॥ आदायप्राक्सुवर्णांगीमूर्वोर्बालांविनिर्ममे ॥ ४ ॥ ऊरूद्भवांसकंदर्पो
दृष्ट्वासर्वांगसुंदरीम् ॥ अमन्यततदानंगःकिमियंसाप्रियारतिः ॥ ५ ॥ तदेव वचनंचारुस्वक्षिभ्रूकुटिलालकम् ॥ सुनासावंशाधरोष्ठमालोक
नपरायणम् ॥ ६ ॥ तावेवचाप्यविरलौपीवरौमग्नचूचुकौ ॥ राजेतेस्याःकुचौपीनौसज्जनाविवसंहतौ ॥ ७ ॥ तदेवतनुचार्वंग्यावलित्रयविभू
षितम् ॥ उदरंराजतेश्लक्ष्णंरोमावलिविभूषितम् ॥ ८ ॥ रोमावलीचजघनाद्यातिस्तनतटद्वयम् ॥ राजतेभृंगमालेवपुलिनात्कमलाकरम् ॥
॥ ९ ॥ जघनंत्वतिविस्तीर्णंभात्यस्यारसनावृतम् ॥ क्षीरोदमथनेनद्धंभुजंगेनेवमंदरम् ॥ १० ॥ कदलीस्तंभसदृशैरूर्ध्वमूलैरथोरुभिः ॥
विभातिसासुचार्वंगीपद्मकिंजल्कसन्निभा ॥ ११ ॥ जानुनीगूढगुल्फेचशुभेजंघेत्वरोमशे ॥ विभात्यस्यास्तथापादावलक्तकसमत्विषौ ॥
॥ १२ ॥ इतिसंचिंतयन्कामस्तामनिंदितलोचनाम् ॥ कामातुरोसौसंजातःकिमुतान्योजनोमुने ॥ १३ ॥ माधवोप्युर्वशींदृष्ट्वासंचिंतयतिना
रद ॥ किंस्वित्कामनरेंद्रस्यराजधानीस्वयंस्थिता ॥ १४ ॥ अज्ञाताशशिनोनूनमियंकांतिर्निशाक्षये ॥ रविरश्मिप्रतापार्तिभीताशरणमा
गता ॥ १५ ॥ इत्थंसंचिंतयन्नेवअवष्टभ्याप्सरोगणम् ॥ तस्थौमुनिरिवध्यानमास्थितःसतुमाधवः ॥ १६ ॥ ततःसविस्मितान्सर्वान्कंदर्पादी
न्महामुने ॥ दृष्ट्वाप्रोवाचवचनंस्मितंकृत्वाशुभव्रतः ॥ १७ ॥ इयंममोरुसंभूताकामाप्सरसमाधवी ॥ नीयतांसुरलोकायदीयतांवासवायच ॥
॥ १८ ॥ इत्युक्ताःकंपमानास्तेजग्मुर्गृह्योर्वशींदिवम् ॥ सहस्राक्षायतेप्रोचूरूपयौवनशालिनीम् ॥ १९ ॥ आचख्युश्चरितंताभ्यांधर्मज्ञाभ्यां
महामुने ॥ देवराजायकामाद्यास्ततोभूद्विस्मयःपरम् ॥ २० ॥ एतादृशंहिचरितंख्यातिमग्र्यांजगामह ॥ पातालेषुतथामर्त्यैदिक्ष्वष्टासुजग

 मच ॥ २१ ॥ एकदानिहतेरौद्रेहिरण्यकशिपौमुने ॥ अभिषिक्तस्तदाराज्येप्रह्लादोनामदानवः ॥ २२ ॥ तस्मिञ्छासतिदैत्येंद्रेदेवब्राह्मण
 पूजके ॥ मखान्भूम्यांनृपतयोयजंतेविधिवत्तदा ॥२३॥ ब्राह्मणाश्चतपोधर्मंतीर्थयात्रांचकुर्वते ॥ वैश्याश्चपशुवृत्तिस्थाःशूद्राःशुश्रूषणेरताः॥
॥ २४ ॥ चातुर्वर्ण्यंततस्तस्थावाश्रमेधर्मकर्मणि ॥ अवर्त्ततततोदेवावृत्त्यायुक्ताभवन्मुने ॥ २५ ॥ ततस्तुच्यवनोनामभार्गवेंद्रोमहातपाः ॥
जगामनर्मदांस्नातुंतीर्थंवैनाकुलेश्वरम् ॥ २६ ॥ तत्रदृष्ट्वामहादेवंनदींस्नातुमवातरत् ॥ अवतीर्णंप्रजग्राहनागःकेकरलोहितः ॥ २७॥ गृहीत
स्तेननागेनसस्मारमनसाहरिम् ॥ संस्मृतेपुंडरीकाक्षेनिर्विषोभून्महोरगः ॥ २८ ॥ नीतस्तेनातिरौद्रेणपन्नगेनरसातलम् ॥ निर्विषश्चापित
त्याजच्यवनंभुजगोत्तमः ॥ २९ ॥ संत्यक्तमात्रोनागेनच्यवनोभार्गवोत्तमः ॥ चचारनागकन्याभिःपूज्यमानःसमंततः ॥ ३० ॥ विचरन्प्र
विवेशाथदानवानांमहत्पुरम् ॥ संपूज्यमानोदैत्येंद्रैःप्रह्लादोथददर्शतम् ॥ ३१ ॥ भृगुपुत्रोमहातेजाःपूजांचक्रेयथार्हतः ॥ संपूजितोपविष्टश्च
पृष्टश्चानामयंप्रति ॥ ३२ ॥ सचोवाचमहातेजामहातीर्थंमहाफलम् ॥ स्नातुमेवागतोस्म्यद्यद्रष्टुंवैनाकुलेश्वरम् ॥३३॥ नद्यामेवावतीर्णोस्मि
गृहीतश्चाहिनाबलात् ॥ समानीतोऽस्मिपातालेदृष्टश्चात्रभवानपि ॥ ३४ ॥ एतच्छ्रुत्वाचवचनंच्यवनस्यदितीश्वरः ॥ प्रोवाचधर्मसंयुक्तंस
वाक्यंवाक्यकोविदः ॥ ३५ ॥ प्रह्लादउवाच ॥ भगवन्कानितीर्थानिपृथिव्यांकानिचांबरे ॥ रसातलेचकानिस्युरेतद्वक्तुंत्वमर्हसि ॥ ३६ ॥
च्यवनउवाच ॥ पृथिव्यांनैमिषंतीर्थमंतरिक्षेचपुष्करम् ॥ चक्रतीर्थंमहाबाहोरसातलसृतंविदुः ॥ ३७ ॥ पुलस्त्यउवाच ॥ श्रुत्वातद्भार्गवव
चोदैत्यराजोमहामुने ॥ नैमिषंगंतुकामोभूद्दानवानिदमब्रवीत् ॥३८॥ प्रह्लादउवाच ॥ उत्तिष्ठध्वंगमिष्यामःस्नातुंतीर्थंहिनैमिषम् ॥ द्रक्ष्यामः
पुंडरीकाक्षंपीतवाससमच्युतम्॥३९॥पुलस्त्यउवाच ॥ इत्युक्तादानवेंद्रेणसर्वेतेदैत्यदानवाः ॥ चक्रुरुद्योगमतुलंनिर्जग्मुश्चरसातलात् ॥४०॥

तेसमभ्येत्यदैतेयादानवाश्चमहाबलाः ॥ नैमिषारण्यमागम्यस्नानंचक्रुर्मुदान्विताः ॥ ४१ ॥ ततोदितीश्वरःश्रीमान्मृगयांसचचारह ॥
चरन्सरस्वतींपुण्यांददर्शविमलोदकाम् ॥ ४२ ॥ तस्यादूरेमहाशाखंसालवृक्षंशरैश्चितम् ॥ ददर्शबाणानपरान्मुखेलग्नान्परस्परम् ॥ ४३ ॥
ततस्तानद्भुताकारान्बाणान्नागोपवीतकान् ॥ दृष्ट्वाऽतुलंतदाचक्रेक्रोधंदैत्येश्वरःकिल ॥४४॥ सददर्शततोदूरात्कृष्णाजिनधरौमुनी ॥ समु
न्नतजटाभारौतपस्यासक्तमानसौ ॥ ४५ ॥ तयोश्चपार्श्वयोर्दिव्येधनुषीलक्षणान्विते ॥ शार्ङ्गमाजगवंचैवअक्षय्यौचमहेषुधी ॥४६॥ तौदृष्ट्वा
मन्यततदादांभिकावितिदानवः ॥ ततःप्रोवाचवचनंतावुभौपुरुषोत्तमौ॥४७॥किंभवद्भ्यांसमारब्धोदंभोधर्मविनाशनः॥क्वतपःक्वजटाभारः
क्वचेमौप्रवरायुधौ ॥ ४८ ॥ अथोवाचनरोदैत्यंकातेचिंतादितीश्वर ॥ सामर्थ्येसतियत्कुर्यात्तत्संपद्येततस्यहि ॥ ४९ ॥ अथोवाचदितीश
स्तौकाशक्तिर्युवयोरिह ॥ मयितिष्ठतिदैत्येंद्रेधर्मसेतुप्रवर्त्तके ॥ ५० ॥ नरस्तंप्रत्युवाचाथआवाभ्यांशक्तिरूर्जिता ॥ नकश्चिच्छक्नुयाज्जे
तुंनरनारायणौयुधि ॥ ५१ ॥ दैत्येश्वरस्ततःक्रुद्धःप्रतिज्ञामारुरोहच ॥ यथाकथंचिज्जेष्यामिनरनारायणौरणे ॥ ५२ ॥ इत्येवमुक्त्वाव
चनंमहात्मादितीश्वरःस्थाप्यबलंवनांते ॥ वितत्यचापंगुणमाविकृष्यतलध्वनिंघोरतरंचकार ॥ ५३ ॥ ततोनरस्त्वाजगवंहिचापमानम्यबा
णान्सुबहून्सिताग्रान् ॥ मुमोचतानप्रतिमैःपृषत्कैश्चिच्छेददैत्यस्तपनीयपुंखैः ॥ ५४ ॥ छिन्नान्समीक्ष्याथनरःपृषत्कान्दैत्येश्वरेणाप्रतिमे
नसंख्ये ॥ क्रुद्धःसमानम्यमहाधनुस्ततोमुमोचचान्यान्विविधान्पृषत्कान् ॥ ५५ ॥ एकंनरोद्वौदितिजेश्वरश्चत्रीन्धर्मसूनुश्चतुरोदितीशः ॥
नरस्तुबाणान्प्रमुमोचपंचषड्दैत्यनाथोनिशितान्पृषत्कान् ॥ ५६ ॥ सर्चर्षिमुख्योद्विचतुश्चदैत्येनरस्तुषट्त्रीणिचदैत्यमुख्यः ॥ षट्सप्तचा
ष्टौनवषण्नरेणद्विसप्ततिंदैत्यपतिःससर्ज्ज ॥ ५७ ॥ शतंनरस्त्रीणिशतानिदैत्यःषड्धर्मपुत्रोदशदैत्यराजः ॥ ततोथसंख्येयतरान्हिबाणान्मु

 मोचतुस्तौसुभृशंहिकोपात् ॥ ५८ ॥ ततोनरोवाणगणैरसंख्यैरवास्तरद्भूमिमथोदिशःखम् ॥ सचापिदैत्यप्रवरःपृषत्कैश्चिच्छेदवेगात्तपनीय
 पुंखैः ॥ ५९ ॥ ततःपतत्रिभिर्वीरौसुभृशंनरदानवौ ॥ तदावरास्त्रैर्युध्येतांघोररूपैःपरस्परम् ॥ ६० ॥ ततस्तुदैत्येनवरास्त्रपाणिनाचापेनि
युक्तंतुपितामहास्त्रम् ॥ नरस्तुचापेपरमायुधेपुनर्युयोजनारायणमस्त्रमुग्रम् ॥ ६१ ॥ दैत्याधिपेनाथपुनर्महास्त्रमाग्नेयमाजौयुगपत्प्रयुक्तम् ॥
महेश्वरास्त्रंपुरुषोत्तमेनसमंसमाहत्यनिपेततुस्तौ ॥ ६२ ॥ ब्रह्मास्त्रेतुप्रशमितेप्रह्लादःक्रोधमूर्छितः ॥ गदांप्रगृह्यतरसाप्रचस्कंदरथोत्तमात् ॥
॥ ६३ ॥ गदापाणिंसमायांतंदैत्यंनारायणस्तदा ॥ दृष्ट्वाततपृष्ठतश्चक्रेनरंयोद्धुमनाःस्वयम् ॥ ६४ ॥ ततोदितीशःसगदःसमाद्रवत्सशार्ङ्ग
वाणंतपसांनिधानम् ॥ ख्यातंपुराणर्षिमुदारविक्रमंनारायणंनारदलोकपालम् ॥ ६५ ॥ इतिश्रीवामनपुराणेप्रह्लादयुद्धंनामसप्तमोऽध्यायः ॥
॥ ७ ॥ पुलस्त्य उवाच ॥ शार्ङ्गपाणिनमायांतंदृष्ट्वाग्रेदानवेश्वरः ॥ परिभ्राम्यगदांवेगान्मूर्ध्निसाध्यमताडयत् ॥ १ ॥ ताडितस्याथगदया
धर्मपुत्रस्यनारद ॥ नेत्राभ्यामपतद्वारिवह्निवर्षनिभंभुवि ॥ २ ॥ मूर्ध्निनारायणस्यापिसागदादानवार्पिता ॥ जगामशतधाब्रह्मञ्छैलशृंगेय
थाशनिः ॥ ३ ॥ ततोनिवृत्त्यदैत्येंद्रःसमास्थायरथंद्रुतम् ॥ आदायकार्मुकंवीरस्तूणाद्बाणंसमाददे ॥ ४ ॥ आनम्यचापंवेगेनगार्द्धपत्रा
ञ्छिलीमुखान् ॥ मुमोचसाध्यायतदाक्रोधांधीकृतमानसः ॥५॥ तानापततएवाशुवाणांश्चंद्रार्द्धसन्निभान् ॥ चिच्छेदवाणैरपरैर्निर्विभेदच
दानवम् ॥ ६ ॥ ततोनारायणंदैत्योदैत्यंनारायणःशरैः ॥ आविध्येतांतदान्योन्यंमर्मभिद्भिरजिह्मगैः ॥ ७ ॥ ततोऽवरेसंनिपातोदेवानामभ
वन्मुने ॥ दिदृक्षूणांतदायुद्धंलघुचित्रंचसुष्ठुच ॥ ८ ॥ ततःसुराणांदुंदुभ्यःखेवाद्यंतमहास्वनाः ॥ पुष्पवर्षमनौपम्यंमुमुचुःसाध्यदैत्ययोः ॥
॥ ९ ॥ ततःपश्यत्सुदैत्येषुगगनस्थेषुतावुभौ ॥ अयुध्येतांमहेष्वासौप्रेक्षकप्रीतिवर्द्धनम् ॥ १० ॥ बवंधतुस्तदाकाशंतावुभौशरवृष्टिभिः ॥

दिशश्चविदिशश्चैवच्छादयेतांशरोत्करैः ॥ ११ ॥ ततोनारायणश्चापंसमाकृष्यमहामुने ॥ विभेदमार्गणैस्तीक्ष्णैःप्रह्लादंसर्वमर्मसु ॥१२॥ तदा
दैत्येश्वरःक्रुद्धश्चापमानम्यवेगवान् ॥ विभेदहृदयेबाह्वोर्वदनेचनरोत्तमम् ॥ १३ ॥ ततोस्यतोदैत्यपतेःकार्मुकंमुष्टिबंधनात् ॥ चिच्छेदैकेन
बाणेनचंद्रार्धाकारवर्चसा ॥१४॥ अपश्यतधनुश्छिन्नंचापमादायचापरम् ॥ अधिज्यंलाघवात्कृत्वाववर्षनिशिताञ्छरान् ॥ १५॥ तानप्यस्यशरा
न्साध्यश्छित्त्वावाणैरवाकिरत् ॥ कार्मुकंचक्षुरप्रेणचिच्छेदपुरुषोत्तमः ॥१६॥ छिन्नंछिन्नंधनुर्दैत्यस्त्वन्यदन्यत्समाददे ॥ समादत्तंतदासाध्यो
मुनेचिच्छेदलाघवात् ॥ १७ ॥ संछिन्नेष्वथचापेषुजग्राहदितिजेश्वरः ॥ परिघंदारुणंदीर्घंसर्वलोहमयंदृढम् ॥ १८ ॥ परिगृह्याथपरिघंभ्रा
मयामासदानवः ॥ भ्राम्यमाणंसचिच्छेदनाराचेनमहामुने ॥ १९ ॥ छिन्नेतुपरिघेश्रीमान्प्रह्लादोदानवेश्वरः ॥ मुद्गरंभ्राम्यवेगेनप्रचिक्षेपनरो
त्तमे ॥ २० ॥ तमापतंतंबलवान्मार्गणैर्दशभिर्मुने ॥ चिच्छेददशधासाध्यःसच्छिन्नोन्यपतद्भुवि ॥ २१ ॥ मुद्गरेवितथेजातेपाशमादायवेग
वान् ॥ प्रचिक्षेपनराग्र्यायतंचचिच्छेदधर्मजः ॥ २२ ॥ पाशेछिन्नेततोदैत्यःशक्तिमादायचिक्षिपे ॥ तांचचिच्छेदबलवान्क्षुरप्रेणमहातपाः
॥ २३ ॥ छिन्नेषुतेषुशस्त्रेषुदानवोन्यन्महद्धनुः ॥ समादायततोबाणैरवतस्तारनारद ॥ २४ ॥ ततोनारायणोदेवोदैत्यनाथंजगद्गुरुः ॥ नारा
चेनाजघानाथहृदयेऽसुरतापनः ॥ २५ ॥ सभिन्नहृदयोब्रह्मन्देवेनाद्भुतकर्मणा ॥ निपपातरथोपस्थेतमपोवाहसारथिः ॥ २६ ॥ ससंज्ञांत्व
चिरेणैवप्रतिलभ्यदितीश्वरः ॥ सुदृढंचापमादायभूयोयोद्धुमुपागतः ॥ २७ ॥ तमागतंसंनिरीक्ष्यप्रत्युवाचनराग्रजः ॥ गच्छदैत्येंद्रयोत्स्या
मःप्रातस्त्वाह्निकमाचर ॥ २८ ॥ एवमुक्तोदितीशस्तुसाध्येनाद्भुतकर्मणा ॥ जगामनैमिषारण्यंक्रियांचक्रेतदाह्निकीम् ॥ २९ ॥ एवंयुध्य
तिदेवेचप्रह्लादोथास्मरन्मुने ॥ रात्रौचिंतयतेयुद्धेकथंजेष्यामिदांभिकम् ॥ ३० ॥ एवंनारायणेनासौसहायुध्यतनारद ॥ दिव्यंवर्षसहस्रंतु

दैत्योदेवंनचाजयत् ॥ ३१ ॥ ततोवर्षसहस्रांतेह्यजितेपुरुषोत्तमे ॥ पीतवाससमभ्येत्यदानवोवाक्यमब्रवीत् ॥ ३२ ॥ किमर्थंदेवदेवेशसा
ध्यंनारायणंहरिम् ॥ विजेतुंनाऽद्यशक्नोमिएतन्मेकारणंवद ॥ ३३ ॥ पीतवासाउवाच ॥ दुर्जयोऽसौमहाबाहुस्त्वयाप्रह्लादधर्मजः ॥ साध्यो
विप्रवरोधीमान्मृधेदेवासुरैरपि ॥ ३४ ॥ प्रह्लादउवाच ॥ यद्यसौदुर्जयोदेवमयासाध्योरणाजिरे ॥ तत्कथंयत्प्रतिज्ञातंतदसत्यंभविष्यति ॥
॥ ३५ ॥ हीनप्रतिज्ञोदेवेशकथंजीवेतमादृशः ॥ तस्मात्तवाग्रतोविष्णोकरिष्येकायशोषणम् ॥ ३६ ॥ पुलस्त्यउवाच ॥ इत्येवमुक्त्वाव
चनंदेवाग्रेदानवेश्वरः ॥ शिरःस्नातस्तदातस्थौगृणन्ब्रह्मसनातनम् ॥३७॥ ततोदैत्यपतिंविष्णुःपीतवासाऽब्रवीद्वचः ॥ गच्छजेष्यसिभक्त्या
तंनयुद्धेनकदाचन ॥ ३८ ॥ प्रह्लादउवाच ॥ असौयद्यजयोदेवत्रैलोक्येष्वपिसुव्रत ॥ नस्थातुंत्वत्प्रसादेनशक्यंकिंसुतरोपतः ॥ ३९ ॥
मयाजितंदेवदेवत्रैलोक्यमपिसुव्रत ॥ जितोयंत्वत्प्रसादेनशक्रःकिमुतधर्मजः ॥ ४० ॥ पीतवासाउवाच ॥ सोऽहंदानवशार्दूललोकानामनु
कंपया ॥ धर्मप्रवर्त्तनार्थायतपश्चर्यांसमास्थितः ॥ ४१ ॥ तस्माद्यदीच्छसिजयंतमाराधयदानव ॥ तंपराजेष्यसेभक्त्यातस्माच्छुश्रूषधर्म
जम् ॥ ४२ ॥ पुलस्त्यउवाच ॥ इत्युक्तःपीतवस्त्रेणदानवेंद्रोमहात्मना ॥ अब्रवीद्वचनंहृष्टःसमाहूयांधकंमुने ॥ ४३ ॥ प्रह्लादउवाच ॥
दैत्याश्चदानवाश्चैवपरिपाल्यास्त्वयांधक ॥ मयोत्सृष्टमिदंराज्यंप्रतीच्छत्वंमहीभुज ॥ ४४ ॥ इत्येवमुक्तोजग्राहराज्यंहैरण्यलोचनः ॥ प्रह्ला
दोपितदागच्छत्पुण्यंवदरिकाश्रमम् ॥ ४५ ॥ दृष्ट्वानारायणंदेवंनरंचदितिजेश्वरः ॥ कृतांजलिपुटोभूत्वाववंदेचरणौतयोः ॥४६॥ तमुवाच
महातेजावाक्यंनारायणोव्ययः॥किमर्थंप्रणतोसीहमामजित्वामहासुर ॥४७॥ प्रह्लादउवाच ॥ कस्त्वांजेतुंप्रभोशक्तःकस्त्वत्तःपुरुषोऽधिकः ॥१३॥
त्वंहिनारायणोऽनंतःपीतवासाजनार्दनः॥४८॥त्वंदेवःपुंडरीकाक्षस्त्वंविष्णुःशार्ङ्गचापधृक्॥त्वमव्ययोमहेशानशाश्वतःपुरुषोत्तम ॥ ४९ ॥

त्वांयोगिनश्चिंतयंतिचार्चयंतिमनीषिणः ॥ जपंतिस्नातकास्त्वांचयजंतित्वांचयाज्ञिकाः ॥५०॥ त्वमच्युतोहृषीकेशश्चक्रपाणिर्धराधरः ॥
महामीनोहयशिरास्त्वमेववरकच्छपः ॥५१॥ हिरण्याक्षरिपुः श्रीमान्भगवान्कार्यसूकरः ॥ मत्पितुर्नाशमकरोर्भगवानपिकेसरी ॥५२ ॥
ब्रह्मात्रिनेत्रोऽमरराड्हुताशःप्रेताधिपोनीरपतिःसमीरः ॥ सूर्योमृगांकोचलजंगमाद्योभवान्विभोनाथखगेंद्रकेतो ॥ ५३ ॥ त्वंपृथ्वीज्योति
राकाशंजलंभूत्वासहस्रशः ॥ त्वयाव्याप्तंजगत्सर्वंकस्त्वांजेष्यतिमाधव ॥ ५४ ॥ भक्त्यायदिहृषीकेशतोषमेषिजगद्गुरो ॥ नान्यथात्वं
प्रशक्तोसिजेतुंसर्वगतोव्ययः ॥ ५५ ॥ भगवानुवाच ॥ परितुष्टोस्मितेदैत्यस्तवेनानेनसुव्रत ॥ भक्त्यात्वनन्ययाचाहंत्वयादैत्यपराजितः ॥
॥ ५६ ॥ पराजितश्चपुरुषोदैत्यदंडंप्रयच्छति ॥ दंडार्थंतेप्रदास्यामिवरंवृणुयमिच्छसि ॥ ५७ ॥ प्रह्लादउवाच ॥ नारायणवरंयाचेयत्त्वंमे
दातुमर्हसि ॥ तन्मेपापंलयंयातुशारीरंमानसंतथा ॥ ५८ ॥ वाचिकंचजगन्नाथयत्त्वयासहयुध्यतः ॥ नरेणयद्वाप्यभवद्वरमेनंप्रयच्छमे ॥
॥ ५९ ॥ नारायणउवाच ॥ एवंभवतुदैत्येंद्रपापंतेयातुसंक्षयम् ॥ द्वितीयंप्रार्थयवरंतंददामितवासुर ॥ ६० ॥ प्रह्लादउवाच ॥ यायाजाये
तमेबुद्धिःसासाविष्णोत्वदाश्रिता ॥ देवार्चनेचनिरतात्वच्चित्तात्वत्परायणा ॥ ६१ ॥ नारायणउवाच ॥ एवंभविष्यत्यसुरवरमन्यंयमि
च्छसि ॥ तंवृणीष्वमहाबाहोप्रदास्याम्यविचारयन् ॥ ६२ ॥ प्रह्लादउवाच ॥ सर्वमेवमयालब्धंत्वत्प्रसादादधोक्षज ॥ त्वत्पादपंकजाभ्यां
हिरतिरस्तुसदामम ॥६३॥ नारायणउवाच ॥ एवमस्त्वपरंचास्तुनित्यमेवाक्षयोव्ययः ॥ अजरश्चामरश्चापिमत्प्रसादाद्भविष्यसि ॥ ६४ ॥
गच्छत्वंदैत्यशार्दूलस्वमावासंक्रियारतः ॥ नकर्मबंधोभवतोमच्चित्तस्यभविष्यति ॥ ६५ ॥ प्रशासयन्नमून्दैत्यान्राज्यंपालयशाश्वतम् ॥
स्वजातिसदृशंदैत्यकुरुधर्ममनुत्तमम् ॥ ६६ ॥ पुलस्त्यउवाच ॥ इत्युक्तोलोकनाथेनप्रह्लादोदेवमब्रवीत् ॥ कथंराज्यंसमादास्येपरित्यक्तं

जगद्गुरो ॥ ६७ ॥ तमुवाचजगत्स्वामीगच्छत्वंनिजमाश्रमम् ॥ हितोपदेष्टादैत्यानांदानवानांतथाभव ॥ ६८ ॥ नारायणेनैवमुक्तःसतदा
दैत्यनायकः ॥ प्रणिपत्यविभुंतुष्टोजगामनगरंनिजम् ॥ ६९ ॥ दृष्टःसभाजितश्चापिदानवैरंधकेनच ॥ निमंत्रितश्चराज्यायनप्रत्यैच्छत्सना
रद ॥ ७० ॥ राज्यंपरित्यज्यमहासुरेंद्रोन्ययोजयत्सत्पथिदानवेंद्रान् ॥ ध्यायन्स्मरन्केशवमप्रमेयंतस्थौतदायोगविशुद्धदेहः ॥ ७१ ॥ एवं
पुरानारददानवेंद्रोनारायणेनोत्तमपूरुषेण ॥ पराजितश्चापिविमुच्यराज्यंतस्थौमनोधातरिसन्निवेश्य ॥ ७२ ॥ इतिश्रीवामनपुराणेप्रह्लाद
वरप्रदानोनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ नारदउवाच ॥ नेत्रहीनःकथंराज्येप्रह्लादेनांधकोमुने ॥ अभिषिक्तोजानतापिराजधर्मंसनात
नम् ॥ १ ॥ पुलस्त्यउवाच ॥ लब्धचक्षुरसौभूयोहिरण्याक्षेपिजीवति ॥ ततोऽभिषिक्तोदैत्येनप्रह्लादेननिजेपदे ॥ २ ॥ नारदउवाच ॥
सचराज्येभिषिक्तस्तुकिमाचरतसुव्रत ॥ देवादिभिःसहकथंसमास्तेतद्वदाशुमे ॥ ३ ॥ पुलस्त्यउवाच ॥ राज्येऽभिषिक्तोदैत्येंद्रोहैरण्या
क्षस्तदांधकः ॥ तपसाराध्यदेवेशंशूलपाणिंत्रिलोचनम् ॥४॥ अजेयत्वमवध्यत्वंसुरसिद्धर्षिपन्नगैः ॥ अदाह्यत्वंहुताशेनअक्लेद्यत्वंजलेनच ॥५॥
एवंसवरलब्धस्तुदैत्योराज्यमपालयत् ॥ शुक्रंपुरोहितंकृत्वासमध्यास्तेततोऽधकः ॥ ६ ॥ ततश्चक्रेसमुद्योगंदेवानामंधकोऽसुरः ॥ आक्र
म्यवसुधांसर्वान्मनुजेंद्रान्पराजयत् ॥७॥ पराजित्यमहीपालान्सहायार्थंनियोज्यच ॥ ततस्तुमेरुशिखरंजगामाद्भुतदर्शनम् ॥८॥ शक्रोपिसुरसै
न्यानिसमुद्योज्यमहागजम् ॥ समारुह्यामरावत्यांगुप्तिंकृत्वापुनर्ययौ ॥९॥ शक्रस्यानुतथैवान्येलोकपालामहौजसः ॥ आरुह्यवाहनंस्वंस्वंस्वा
युधानिययुर्वहिः ॥ १० ॥ देवसेनापिचसमंशक्रेणाद्भुतकर्मणा ॥ निर्जगामातिवेगेनगजवाजिरथादिभिः ॥ ११ ॥ अग्रतोद्वादशादित्याः
पृष्ठतश्चत्रिलोचनः ॥ मध्येऽष्टौवसवोविश्वेसाध्याश्विमरुतांगणैः ॥ यक्षविद्याधराद्याश्चस्वंस्वंवाहनमास्थिताः ॥ १२ ॥ नारदउवाच ॥ रुद्रा

दीनांवदस्वेहवाहनानिचसर्वशः ॥ एकैकस्यापिधर्मज्ञपरंकौतूहलंमम ॥ १३ ॥ पुलस्त्यउवाच ॥ शृणुष्वकथयिष्यामिसर्वेषामपिनारद ॥
वाहनानिसमासेनएकैकस्यानुपूर्वशः ॥ १४ ॥ दनुहस्ततलोत्पन्नंमहासत्त्वंमहागजम् ॥ श्वेतवर्णमहावीर्यदेवराजस्यवाहनम् ॥ १५ ॥
रुद्रौजःसंभवंभीमंकृष्णवर्णमनोजवम् ॥ पौंड्रकंनाममहिषंधर्मराजस्यनारद ॥ १६ ॥ रुद्रकर्णमलोद्भूतंश्यामंजलधिसंज्ञकम् ॥ शिशुमारं
दिव्यगतिंवाहनंवरुणस्यच ॥ १७ ॥ रौद्रंशकटचक्राक्षंशैलाकारंनरोत्तमम् ॥ अंबिकापादसंभूतंवाहनंधनदस्यतु ॥ १८ ॥ एकादशानां
रुद्राणांवाहनानिमहामुने ॥ गंधर्वाश्चमहावीर्याभुजगेंद्राःसुदारुणाः ॥ श्वेतानिसौरभेयाणिवृषाण्युग्रजवानिच ॥ १९ ॥ रथंचंद्रमसश्चार्द्धसह
स्रंहंसवाहनम् ॥ हयोष्ट्ररथवाहाश्चआदित्यामुनिसत्तम ॥ २० ॥ कुंजरस्थाश्चवसवोयक्षाश्चनरवाहनाः ॥ किन्नराभुजगारूढाहयारूढौतथा
श्विनौ ॥ २१ ॥ सारंगाधिष्ठिताब्रह्मन्मरुतोघोरदर्शनाः ॥ शुकारूढाश्चकवयोगंधर्वाश्चपदातिनः ॥ २२ ॥ आरुह्यवाहनान्येवंस्वानिस्वान्य
मरोत्तमाः ॥ संनह्यनिर्ययुर्हृष्टायुद्धायसुमहौजसः ॥ २३ ॥ नारद उवाच ॥ गदितानिसुरादीनांवाहनानित्वयामुने ॥ दैत्यानांवाहनान्ये
वयथावद्वक्तुमर्हसि ॥ २४ ॥ पुलस्त्य उवाच ॥ शृणुष्वदानवादीनांवाहनानिद्विजोत्तम ॥ कथयिष्यामितत्त्वेनयथावच्छ्रोतुमर्हसि ॥ २५ ॥
अंधकस्यरथोदिव्योयुक्तःपरमवाजिभिः ॥ कृष्णवर्णःसहस्रारस्त्रिनल्वपरिमाणवान् ॥ २६ ॥ प्रह्लादस्यरथोदिव्यश्चंद्रवर्णैर्हयोत्तमैः ॥ उह्य
मानस्तथाष्टाभिःश्वेतरुक्ममयःशुभः ॥ २७ ॥ विरोचनस्यचगजःकुजंभस्यतुरंगमः ॥ जंभस्यतुरथोदिव्योहयैःकांचनसन्निभैः ॥ २८ ॥
शंकुकर्णस्यतुरगोहयग्रीवस्यकुंजरः ॥ रथोमयस्यविख्यातोदुंदुभेश्चमहोरगः ॥ २९ ॥ शंबरस्यविमानोभूदयःशंकोर्मृगाधिपः ॥ बलिवृत्रौच
बलिनौगदामुसलधारिणौ ॥ ३० ॥ पद्भ्यांदैवतसैन्यानिअभिद्रवितुमुद्यतौ ॥ ततोरणोभूत्तुमुलःसंकुलोतिभयंकरः ॥ ३१ ॥ रजसासंवृतो

लोकः पिंगवर्णेननारद ॥ नाज्ञासीच्चपितापुत्रंनपुत्रःपितरंतथा ॥ ३२ ॥ स्वानेवान्येनिजघ्नुर्वैपरानन्येचसुव्रत ॥ अभिद्रुतोमहावेगोरथोपरिरथ
स्तदा ॥ ३३ ॥ गजोमत्तगजेंद्रंचसादीसादिनमन्वगात् ॥ पदातिरपिसंक्रुद्धःपदातिनमथोल्वणम् ॥३४॥ परस्परंचप्रत्यघ्नन्नन्योन्यजयकां
क्षिणः ॥ ततस्तुसंकुलेतस्मिन्युद्धेदैवासुरेमुने ॥ ३५ ॥ प्रावर्ततनदीघोराशमयंतीरणेरजः ॥ असृक्तोयारथावर्त्तायोधसंघट्टवाहिनी ॥३६॥
गजकुंभमहाकूर्माशरमीनादुरत्यया ॥ तीव्राग्रप्रासमकरामहासिग्राहवाहिनी ॥ ३७ ॥ अंत्रशेवालसंकीर्णापताकाफेनमालिनी ॥ गृध्रकंक
महाहंसाश्येनचक्राह्वमंडिता ॥ ३८ ॥ वरवायसकादंवागोमायुश्वापदाकुला ॥ पिशाचमुनिसंकीर्णादुस्तराप्राकृतैर्जनैः ॥ ३९ ॥ रथप्लवैः
संतरंतःशूरास्तांप्रजगाहिरे ॥ आगुल्फाहवमज्जंतःसूदयंतःपरस्परम् ॥ समुत्तरंतोवेगेनयोधाजयधनेप्सवः ॥ ४० ॥ ततस्तुरौद्रेसुरदैत्यसा
दनेमहाहवेभीरुभयंकरेऽथ ॥ रक्षांसियक्षाश्चसुसंप्रहृष्टाःपिशाचयूथास्त्वभिरेमिरेच ॥ ४१ ॥ पिबंत्यसृग्गाढतरंभटानामालिंग्यमांसानिच
भक्षयंति ॥ वसांविलुंपंतिचविस्फुरंतिगर्जंत्यथान्योन्यमथोवयांसि ॥ ४२ ॥ मुंचंतिफेत्काररवाञ्छिवाश्चक्रंदंतियोधाभुविवेदनार्त्ताः ॥ शस्त्र
प्रतप्तानिपिबंतिचान्येयुद्धंश्मशानप्रतिमंबभूव ॥४३॥ तस्मिञ्छिवाघोरतरेप्रवृत्तेसुरासुराणांसुभयंकरेहि ॥ युद्धेवभौप्राणपणोपविद्धंद्वंद्वेति
शास्त्रज्ञगतंदुरोदरम्॥४४॥ हिरण्यचक्षोस्तनयोरणेंधकोरथेस्थितोवाजिसहस्रयोजिते॥मत्तेभपृष्ठस्थितमुग्रतेजसंसमेयिवान्देवपतिंशतक्रतुम्
॥४५॥समापतंतंमहिषाधिरूढंयमंप्रतीच्छन्वलवान्दितीशः ॥ प्रल्हादनामातुरगाष्टयुक्तंरथंसमास्थायसमुद्यतास्त्रः॥४६॥विरोचनश्चापिजले
श्वरंत्वगाज्जंभस्त्वथागाद्धनदंवलाढ्यम् ॥ वायुंसमभ्याच्छतसंचरोथमयोहुताशंयुयुधेमुनींद्र ॥ ४७ ॥ अन्येहयग्रीवमुखामहावलादितेस्त
नूजादनुपुंगवाश्च ॥ सुरान्हुताशार्कवसूरगेश्वरान्द्वंद्वंसमासाद्यमहावलान्विताः ॥ ४८ ॥ गर्जंत्यथान्योन्यमुपेत्ययुद्धेचापानिकर्षंत्यतिवेगि

ताश्च ॥ मुंचंतिनाराचगणान्सहस्रशआगच्छहेतिष्ठसिकिंविभेषि ॥ ४९ ॥ शरैस्तुतीक्ष्णैरभितापयंतोमंदाकिनीवेगनिभांवहंतीम् ॥ प्राव
र्त्तयंतोभयदांनदींचह्यस्त्रैरमोघैरभिताडयंतः ॥ ५० ॥ त्रैलोक्यमाकांक्षिभिरुग्रवेगैःसुरासुरैर्नारदसंप्रवृद्धैः ॥ पिशाचरक्षोगणपुष्टिवर्धनीमु
त्तर्तुमिच्छद्भिरसृङ्नदीवभौ ॥ ५१ ॥ वाद्यंतितूर्याणिसुरासुराणांपश्यंतिखस्थामुनिसिद्धसंघाः ॥ नयंतितानप्सरसोरणाग्राद्धतारणेयेभि
मुखास्तुशूराः ॥ ॥ ५२ ॥ इतिश्रीवामनपुराणेदेवासुरयुद्धंनामनवमोऽध्यायः ॥ ९ ॥ पुलस्त्यउवाच ॥ ततःप्रवृत्तेसंग्रामेभीरूणांभयव
र्धने ॥ सहस्राक्षोमहाचापमादायव्यसृजच्छरान् ॥ १ ॥ अंधकोपिमहावेगंधनुराकृष्यभास्वरम् ॥ पुरंदरायचिक्षेपशरान्बर्हिणवाससः ॥
॥ २ ॥ तावन्योन्यंसुतीक्ष्णाग्रैःशरैःसन्नतपर्वभिः ॥ रुक्मपुंखैर्महावेगैराजघ्नतुरुभावपि ॥३॥ ततःक्रुद्धःशतमखःकुलिशंभ्राम्यपाणिना ॥
चिक्षेपदैत्यराजायतंददर्शतथांधकः ॥ ४ ॥ आजघानचबाणौघैरस्त्रैःशस्त्रैःसनारद ॥ तान्भस्मसात्तदाचक्रेनागानिवहुताशनः ॥ ५ ॥ ततो
तिवेगितंवज्रंदृष्ट्वाबलवतांवरः ॥ समाप्लुत्यरथात्तस्थौभुविबाहुसहायवान् ॥ ६ ॥ रथंसारथिनासार्धंसाश्वध्वजसकूबरम् ॥ भस्मकृत्वाथकु
लिशमंधकंसमुपाययौ ॥ ७ ॥ तमापतंतंवेगेनमुष्टिनाहत्यभूतले ॥ पातयामासबलवाञ्जगर्जेचतदांधकः ॥ ८ ॥ तंगर्जमानंवीक्ष्याथवा
सवःसायकैर्दृढम् ॥ ववर्षतान्वीरयितुमभ्ययात्सशतक्रतुम् ॥ ९ ॥ आजघानतलेनेभंकुंभमध्येतदाकरम् ॥ जानुनाचसमाहत्यविषा
णंप्रबभंजच ॥ १० ॥ वाममस्यतथापार्श्वंसमाहत्यांधकस्त्वरन् ॥ गजेंद्रंपातयामासप्रहारैर्जर्जरीकृतम् ॥११॥ गजेंद्रात्पतमानाच्चअवप्लु
त्यशतक्रतुः ॥ पाणिनावज्रमादायप्रविवेशामरावतीम् ॥ १२ ॥ पराङ्मुखेसहस्राक्षेतद्दैवतबलंमहत् ॥ पातयामासदैत्येंद्रःपादमुष्टितला
दिभिः ॥ १३ ॥ ततोवैवस्वतोदंडंपरिभ्राम्यद्विजोत्तम ॥ समभ्यधावत्प्रह्लादंहंतुकामःसुरोत्तमः ॥ १४ ॥ तमापतंतंबाणौघैर्ववर्षविनद

न्मुहुः ॥ हिरण्यकशिपोःपुत्रश्चापमानम्यवेगवान् ॥ १५ ॥ तांबाणवृष्टिमतुलांदंडेनाहत्यभास्करिः ॥ शातयित्वाप्रचिक्षेपदंडंलोकभयं
करम् ॥ १६ ॥ सवायुपथमास्थायधर्मराजकरेस्थितः ॥ जज्वालकालाग्निनिभोयद्वद्दग्धुंजगत्त्रयम् ॥ १७ ॥ जाज्वल्यमानमायांतंदंडं
दृष्ट्वादितेःसुताः ॥ प्राक्रोशंतिहतःकष्टंप्रल्हादोयंयमेनहि ॥ १८ ॥ तमाक्रंदितमाकर्ण्यहिरण्याक्षसुतोंधकः ॥ प्रोवाचमाभैष्टमयिस्थिते
कोयंसुराधमः ॥ १९ ॥ इत्येवमुक्त्वावचनंवेगेनाभिससारच ॥ जग्राहपाणिनादंडंसव्यहस्तेननारद ॥ २० ॥ तमादायततोवेगाद्भ्राम
यामासचांधकः ॥ जगर्जचमहानादंयथाप्रावृषितोयदः ॥ २१ ॥ प्रल्हादंरक्षितंदृष्ट्वादंडाद्दैत्येश्वरेणहि ॥ साधुवादंतदाचक्रुर्दैत्यदानवयू
थपाः ॥ २२ ॥ भ्रामयंतंमहादंडंदृष्ट्वाभानुसुतोमुने ॥ दुःसहंदुर्धरंमत्वाअंतर्धानमगाद्यमः ॥ २३ ॥ अंतर्हितेधर्मराजेप्रल्हादोपिमहामुने ॥
दारयामासवलवान्देवसैन्यंसमंततः ॥ २४ ॥ वरुणःशिशुमारस्थोवद्ध्वापाशैर्महासुरान् ॥ गदयादारयामासतमभ्यागाद्विरोचनः ॥ २५ ॥
तोमरैर्वज्रसंस्पर्शैःशक्तिभिर्मार्गणैरपि ॥ जलेशंताडयामासमुद्गरैर्वज्रसन्निभैः ॥ २६ ॥ ततस्तंगदयाभ्येत्यपातयित्वाधरातले ॥ अभिद्रु
त्यवबंधाशुपाशैर्मत्तगजंवली ॥ २७ ॥ तान्पाशाञ्छतधाचक्रेवेगाच्चदनुजेश्वरः ॥ वरुणंचसमभ्येत्यमध्येजग्राहनारद ॥ २८ ॥ ततोदंतीच
दंताभ्यांप्रचिक्षेपतथाव्ययः ॥ ममर्दचतथापद्भ्यांसगदंसलिलेश्वरम् ॥ २९ ॥ तंवध्यमानंवीक्ष्याथशशांकःशिशिरांशुमान् ॥ अभ्ये
त्यताडयामासमार्गणैःकायदारणैः ॥ ३० ॥ संमर्द्यमानःशिशिरांशुवाणैरवापपीडांपरमांगजेंद्रः ॥ क्लिष्टश्चवेगात्पयसामधीशंमुहुर्मुहुःपाद
तलैर्ममर्द ॥ ३१ ॥ संमर्द्यमानोवरुणोगजेंद्रंपद्भ्यांसुगाढंजगृहेमहर्षे ॥ पादेषुभूमिंकरयोःस्पृशंश्चमूर्द्धानमुल्लास्यवलान्महात्मा ॥ ३२ ॥
गृह्यांगुलीभिश्चगजस्यपुच्छंकृत्वेहवंधंभुजगेश्वरेण ॥ उत्पाट्यचिक्षेपविरोचनं हिसकुंजरंखेसनियंतृवाहम् ॥ ३३ ॥ क्षिप्तोजलेशेनविरोचन

ॐश्रीगणेशाय नमः ॥ श्रीसरस्वत्यैनमः ॥ ॐनमोभगवतेवासुदेवाय ॥ त्रैलोक्यराज्यमाच्छिद्यबलेरिंद्राययोददौ ॥ नमस्तस्मैसुरेशाय सदा वामनरूपिणे ॥ १ ॥ पुलस्त्यमृषिमासीनमाश्रमेवाग्विदांवरम् ॥ नारदःपरिपप्रच्छपुराणं वामनाश्रयम् ॥ २ ॥ कथंभगवताब्रह्मन् विष्णुनाप्रभविष्णुना ॥ वामनत्वंधृतंपूर्वंतन्ममाचक्ष्वपृच्छतः ॥ ३ ॥ कथंचवैष्णवोभूत्वाप्रह्लादोदैत्यसत्तमः ॥ त्रिदशैर्युयुधेसार्द्धमत्रमेसंशयोमहान् ॥ ४ ॥ श्रूयतेचद्विजश्रेष्ठदक्षस्यदुहितासती ॥ शंकरस्यप्रियाभार्याबभूववरवर्णिनी ॥ ५ ॥ किमर्थंसापरित्यज्यस्वशरीरंवरानना ॥ जाताहिमवतोगेहेगिरींद्रस्यमहात्मनः ॥ ६ ॥ पुनश्चदेवदेवस्यपत्नीत्वमगमच्छुभा ॥ एतंमेसंशयंछिंधिसर्ववित्त्वंमतोऽसिमे ॥ ॥ ७ ॥ तीर्थानांचैवमाहात्म्यंदानानांचैवसत्तम ॥ व्रतानांविविधानांचविधिमाचक्ष्वमेद्विज ॥ ८ ॥ एवमुक्तोनारदेनपुलस्त्योमुनिसत्तमः ॥ प्रोवाचवदतांश्रेष्ठोनारदंतपसोनिधिम् ॥ ९ ॥ पुलस्त्यउवाच ॥ पुराणंवामनंवक्ष्येक्रमान्निखिलमादितः ॥ अवधानंस्थिरंकृत्वा शृणुष्वमुनिसत्तम ॥ १० ॥ पुराहैमवतीदेवीमंदरस्थंमहेश्वरम् ॥ उवाचवचनंदृष्ट्वाग्रीष्मकालमुपस्थितम् ॥ ११ ॥ ग्रीष्मःप्रवृत्तोदेवेशनचमेविद्यतेगृहम् ॥ यत्रवातातपौग्रीष्मौस्थितयोर्नौगमिष्यतः ॥ १२ ॥ एवमुक्तोभवान्यैतच्छंकरो वाक्यमब्रवीत् ॥ निराश्रयोऽहंसुदतिसदाऽरण्यचरःशुभे ॥ १३ ॥ इत्युक्ताशंकरेणाथवृक्षच्छायासुनारद ॥ निदाघकालमनयत्समंशर्वेणसासती ॥ १४ ॥ निदाघांतेसमुद्भूतोनिर्जनाचरितोद्भुतः ॥ घनांधकारिताशोवैप्रावृट्कालोऽतिरावववान् ॥ १५ ॥ तंदृष्ट्वादक्षतनुजाप्रावृट्कालमुपस्थितम् ॥ प्रोवाचवाक्यंदेवेशंसतीसप्रणयंतदा ॥ १६ ॥ सत्युवाच ॥ निवांतिवाताहृदयावदारणागर्जंत्यमीतोयधरामहेश ॥ स्फुरंतिनीलाभ्रगणेषुविद्युतोवाशंतिकेकारवमेवबर्हिणः ॥ १७ ॥ पतंतिधारागगनात्परिच्युतावकावलाकाश्वभजंतितोयदान् ॥ कदंबसर्ज्जार्ज्जुनकेतकीनांपुष्पाणिमुंचंतिचमारुतादिना ॥ १८ ॥

०पु० श्रुत्वैवमेघस्यहृढंतुगर्जितंत्यजंतिहंसाश्चसरांसितत्क्षणात् ॥ नीचोद्धतान्सत्पुरुषायथैवोश्रयान्प्रवृद्धमूलीनापसंत्यजति ॥१९॥ इमान्द्रुमान् अ०-
॥१॥ तथामृगाणांत्वरंतिधावन्तिरमंतिशंभो ॥ धावंतिहृष्टानिवनस्थलीषुसर्वा भुवस्तोयदसंप्रवृद्धचा ॥ २० ॥ राजंतिशष्पावृतसस्ययुक्तास्त
थाऽचिराभाःसुतरांस्फुरंति ॥ रम्येषुनीलेषुघनेषुदेवनूनंसमृद्धिंमलिनस्यहृष्ट्वा ॥ २१ ॥ चरंतिशूरास्तरणोद्गमेषुउद्धृत्तवेगाःसहसैव १
निम्नगाः ॥ जाताःशशांकांकितचारुमौलेकिमत्रचित्रंयदनुज्वलंजनम् ॥ २२ ॥ श्रयंतिनीचानुगताह्रियोषितोनीलेषुमेघेषुसमाश्रितंनभः॥
पुष्पेषुसर्ज्जासुकुलेषुनीपाःफलेषुचश्रीश्चपयस्स्वथापगाः ॥ २३ ॥ पत्रेषुपद्मेषुमहासरांसिसुदुस्तरःसंप्रतिवर्षकालः ॥ इतीदृशेशंकर
दुःसहेद्भुतेकालेसुरौद्रेननुतेब्रवीमि ॥ २४ ॥ गृहंकुरुष्वात्रमहाचलोत्तमेसुनिर्वृतायेनभवामिशंभो ॥ इत्थंत्रिनेत्रःश्रुतिरामणी
यकंश्रुत्वावचोवाक्यमिदंबभाषे ॥ २५ ॥ नमेऽस्तिवित्तंगृहसंचयार्थेमृगारिचर्मावृतदेहिनःप्रिये ॥ ममोपवीतंभुजगेश्वरःफणीकर्णे
पिपद्मश्चतथैवपिंगलः ॥ २६ ॥ केयूरमेकंममकंबलस्त्वहिर्द्वितीयमन्योभुजगोधनंजयः ॥ नागस्तथैवाश्वतरोहिकंकणंसव्येतरेतक्षकउत्तरं
तथा ॥ नीलोपिनीलांजनतुल्यवर्णःश्रोणीतटेराजतिसुप्रतिष्ठः ॥ २७ ॥ पुलस्त्यउवाच ॥ इतिवचनमथोग्रंशंकरात्सामृडानीश्रुतमपितद
सत्यंश्रीमदाकर्ण्यभीता ॥ अवनितलमवेक्ष्यस्वामिनोवासकृच्छ्रात्परिवदतिसरोषंलज्जयोच्छ्वस्यचोष्णम् ॥२८॥ देव्युवाच ॥ किमेवंसंश्रि
तायास्तुप्रावृट्कालोगमिष्यति ॥ वृक्षमूलेस्थितायास्तुसुनयेनवदान्यय ॥ २९ ॥ शंकरउवाच ॥ घनावस्थितदेहायाःप्रावृट्कालःप्रया
स्यति ॥ यथांबुधारानतवनिपतिष्यंतिविग्रहे ॥ ३० ॥ पुलस्त्यउवाच ॥ ततोहरस्तद्वनखंडमुन्नतमारुह्यतस्थौसहदक्षकन्यया ॥ ततो ॥१॥
भवन्नाममहेश्वरस्यजीमूतकेतुस्त्वितिविश्रुतंदिवि ॥ ३१ ॥ इतिश्रीवामनपुराणेहरलीलितेप्रथमोऽध्यायः ॥ १ ॥ ॥ पुलस्त्यउवाच ॥

ततस्त्रिनेत्रस्यगतःप्रावृट्कालोघनोपरि ॥ लोकानंदकरीरम्याशरत्समभवन्मुने ॥ १ ॥ त्यजंतिनीलांबुधरानभस्तलंवृक्षांश्चकंकाःसरित
स्तटानि ॥ पद्मानिगंधंनिलयानिवायसारुरुर्विषाणंकलुषंजलाशयाः ॥ २ ॥ विकासमायांतिचपंकजानिचंद्रांशवोभांतिलताःसुपुष्पाः ॥
नंदंतिकृष्टान्यपिगोकुलानिसंतश्चसंतोषमनुव्रजंति ॥ ३ ॥ सरस्सुपद्मंगगनेचतारकाजलाशयेष्वेवतथापयांसि ॥ सतांचचित्तंहिदिशांमुखैः
समंवैमल्यमायांतिशशांककांतयः ॥ ४ ॥ एतादृशेहरःकालेमेघपृष्ठाधिवासिनम् ॥ सतीमादायशैलेंद्रंमंदरंसमुपाययौ ॥ ५ ॥ ततोमंदर
पृष्ठेऽसौस्थितःसमशिलातले ॥ रेमेसशंभुर्भगवान्सत्यासहमहाद्युतिः ॥ ६ ॥ ततोगतायांशरदिप्रबुद्धेचैवकेशवे ॥ दक्षःप्रजापतिश्रेष्ठोयष्टु
मारभतक्रतुम् ॥ ७ ॥ द्वादशैवसचादित्याञ्छक्रादींश्चसुरोत्तमान् ॥ सकश्यपान्समामंत्र्यसदस्यान्समचीकरत् ॥ ८ ॥ अरुंधत्यानुसहि
तंवसिष्ठंशंसितव्रतम् ॥ सहानुसूययात्रिंचसहधृत्याचकौशिकम् ॥ ९ ॥ अहल्ययागौतमंचभरद्वाजममायया ॥ चंद्रयासंहितंब्रह्मन्नृषिमंगि
रसंतथा ॥ १० ॥ आमंत्र्यकृतवान्दक्षःसदस्यान्यज्ञकर्मणि ॥ सदस्यान्गुणसंपन्नान्वेदवेदांगपारगान् ॥ ११ ॥ धर्मंचससमाहूयभार्ययाऽ
हिंसयासह ॥ निमंत्र्ययज्ञवाटस्यद्वारपालार्थमादिशत् ॥ १२ ॥ अरिष्टनेमिनंचक्रेइध्माहरणकारिणम् ॥ चंद्रयासहितंब्रह्मन्नृषिमंगिरसंतथा
॥१३॥ मृष्टान्नपानसंस्कारेसम्यग्दक्षःप्रयुक्तवान् ॥ भृगुंचसत्रसंस्कारेसम्यग्दक्षःप्रयुक्तवान् ॥१४॥ तथाचंद्रमसंदेवंरोहिण्यासहितंशुचिम्॥
धनानामाधिपत्येसयुक्तवान्हिप्रजापतिः ॥ १५ ॥ जामातृन्दुहितॄश्चैवदौहित्रांश्चप्रजापतिः ॥ सशंकरांसतींमुक्त्वामखेसर्वान्न्यमंत्रयत् ॥
॥ १६ ॥ नारदउवाच ॥ किमर्थंलोकपतिनाधनाध्यक्षोमहेश्वरः ॥ ज्येष्ठःश्रेष्ठोवरिष्ठोपिआद्योपिननिमंत्रितः ॥ १७ ॥ पुलस्त्यउवाच ॥
ज्येष्ठःश्रेष्ठोवरिष्ठोपिआद्योपिभगवाञ्छिवः ॥ कपालीतिविदित्वेशोदक्षेणननिमंत्रितः ॥ १८ ॥ नारदउवाच ॥ किमर्थंदेवताश्रेष्ठःशूल

पाणिस्त्रिलोचनः ॥ कपालीभगवाञ्जातःकर्मणाकेनशंकरः ॥ १९ ॥ पुलस्त्य उवाच ॥ शृणुष्वावहितोभूत्वाकथामेतांपुरातनीम् ॥ प्रोक्तां
ह्यादिपुराणेषुब्रह्मणाव्यक्तमूर्त्तिना ॥ २० ॥ पुरात्वेकार्णवेलोकेनष्टेस्थावरजंगमे ॥ नष्टचंद्रार्कनक्षत्रेप्रनष्टपवनानले ॥ २१ ॥ अप्रतर्क्यम
विज्ञेयंभावाभावविवर्जितम् ॥ निमग्नवीरुत्सतृणंतमोभूतंसुदुर्दिनम् ॥ २२ ॥ तस्मिन्सशेतेभगवान्निशांवर्षसहस्रकीम् ॥ रात्र्यंतेसृजतेलोका
न्राजसंरूपमास्थितः ॥ २३ ॥ रेजेसपंचवदनोवेदवेदांगपारगः ॥ स्रष्टाचराचरस्यास्यजगतोद्भुतदर्शनः ॥ २४ ॥ तमोमयस्तथैवान्यःसमु
द्भूतस्त्रिलोचनः ॥ शूलपाणिःकपर्दीचअक्षमालांचदर्शयन् ॥२५॥ ततोमहात्माह्यसृजदहंकारंसुदारुणम् ॥ येनाक्रांतावुभौदेवौतावेवब्रह्म
शंकरौ ॥ २६ ॥ अहंकारावृतोरुद्रःप्रत्युवाचपितामहम् ॥ कोभवानिहसंप्राप्तःकेनसृष्टोऽसिमांवद ॥ २७ ॥ पितामहोप्यहंकारीप्रत्युवा
चाथकोभवान् ॥ भवतोजनकःकोऽत्रजननीवातदुच्यताम् ॥ २८ ॥ इत्यन्योन्यंपुराताभ्यांब्रह्मेशाभ्यांकिलप्रियः ॥ परिवादोभवत्तत्रउत्प
त्तिर्भवतोऽभवत् ॥ २९ ॥ भवानप्यंतरिक्षंह्रिजातमात्रस्तदोत्पतत् ॥ धारयन्नतुलांवीणांकुर्वन्किलकिलाध्वनिम् ॥ ३० ॥ ततोविनिर्जितः
शंभुर्मानिनाब्रह्मयोनिना ॥ तस्थावधोमुखोदीनोग्रहाक्रांतोयथाशशी ॥ ३१ ॥ पराजितेलोकपतौदेवेनपरमेष्ठिना ॥ क्रोधांधकारितंरुद्रंपं
चमंमुखमब्रवीत् ॥ ३२ ॥ अहंतेप्रतिजानामितमोमूर्त्तौत्रिलोचन ॥ दिग्वासावृषभारूढोलोकक्षयकरोभवान् ॥ ३३ ॥ इत्युक्तःशंकरःक्रु
द्धोब्रह्माणंघोरचक्षुषा ॥ निर्दग्धुकामस्त्वनिशंददर्शभगवानजः ॥ ३४ ॥ ततस्त्रिनेत्रस्यसमुद्भवंतिवक्त्राणिपंचाथसुदुर्दृशानि ॥ सितंचरक्तं
कनकावदातंनीलंतथापिंजरकंचरौद्रम् ॥ ३५ ॥ वक्त्राणिदृष्ट्वाऽर्कसमानिसद्यःपितामहोवाक्यमुवाचरुद्रम् ॥ समाहतस्याथजलस्यबुद्बुदा
भवंतिकिंतेषुपराक्रमोऽस्ति ॥ ३६ ॥ तच्छ्रुत्वाक्रोधयुक्तेनशंकरेणमहात्मना ॥ नखाग्रेणशिरश्छिन्नंब्राह्मंपरुषवादिनम् ॥ ३७ ॥ तच्छिन्नं

मा०	वैशाखमासमें माधवं भगवान्की पूजाकी सामग्री कौनकौनसी हैं हे नारदजी ! ये सब मेरें सामनें विस्तारपूर्वक कहो मैं श्रद्धा करके सुनू हूं ॥ ७ ॥ मा०
श्रीनारदजी बोले कि मैंनेभी ब्रह्माजीसे यही प्रश्न किया और प्रथम भगवान्ने लक्ष्मीजीसे मासमाहात्म्य कहे सोई ब्रह्माजीने मेरे प्रति कहे ॥ ८ ॥
इन बारह मासोंमें कार्त्तिक, माघ और वैशाख ये तीनमास उत्तमहैं और इन तीनोंमेंभी वैशाखमास परमोत्तमहै ॥९॥ यह माताकी तरह सब जीवोंको

कैर्द्रव्यैःपूजनीयोसौमाधवोमाधवागमे ॥ एतन्नारदविस्तार्यमह्यंश्रद्धावतेवद ॥ ७ ॥ श्रीनारदउवाच ॥ ॥ मयापृष्टःपुराब्रह्मा
मासधर्मान्पुरातनान् ॥ व्याजहारपुराप्रोक्तंयच्छ्रियैपरमात्मना ॥ ८ ॥ ततोमासाविशिष्टोक्ताःकार्तिकोमाघएवच ॥ माधवस्तेषु
वैशाखंमासानामुत्तमंव्यधात् ॥ ९ ॥ मातेवसर्वजीवानांसदैवेष्टप्रदायकः ॥ दानयज्ञव्रतस्नानैःसर्वपापविनाशनः ॥ १० ॥ धर्मय
ज्ञक्रियासारस्तपःसारःसुरार्चितः ॥ विद्यानांवेदविद्येवमंत्राणांप्रणवोयथा ॥ ११ ॥ भूरुहाणांसुरतरुर्धेनूनांकामधेनुवत् ॥ शेषवत्सर्व
नागानांपक्षिणांगरुडोयथा ॥ १२ ॥

सदाही अभीष्ट पदार्थोंका दाताहै, इस महीनामें दान यज्ञ, व्रत और स्नान करनेसे सम्पूर्ण पाप नष्ट होय जांय हैं ॥१०॥ यह महीना धर्म, यज्ञ और
आह्निक कर्मोंका साररूपहै, तपोंका सारहै और देवताओं करके अर्चितहै सब विद्याओंमें वेदविद्यारूपहै मन्त्रोंमें प्रणव जो ओंकार उसके समानहै ॥११॥
वृक्षोंमें कल्पवृक्ष और गौओंमें कामधेनुके समानहै, नागोंमें शेषनाग और पक्षियोंमें गरुडके समान है ॥ १२ ॥

॥ श्रीगणेशाय नमः॥ मनुष्योंमें उत्तम नरनारायण, सरस्वतीदेवी और व्यासजीको नमस्कार करके जयशब्दका उच्चारण करै॥ १ ॥ सूतजी कहनेलगे कि राजा अंबरीषने परमेष्ठी ब्रह्माजीके पुत्र नारदजीसे फिर वैशाखमाहात्म्यका प्रश्न किया॥ २ ॥ अंबरीष बोले कि हे ब्रह्मन्! जैसे जैसे आपने सम्पूर्ण महीनाओंके माहात्म्य वर्णन किये सो सब मैंने पहिले सुनलियेहैं॥ ३ ॥ इन सबमें वैशाखमास निश्चयही सर्वोत्तमहै, इससे वैशाखमाहात्म्यको विस्तार

॥ श्रीगणेशायनमः ॥ ॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमम् ॥ देवींसरस्वतींव्यासंततोजयमुदीरयेत् ॥ १ ॥ ॥ सूतउवाच ॥ भूयोप्यंबरीषोराजाब्रह्मणःपरमेष्ठिनः ॥ पुण्यंमाधवमाहात्म्यंनारदंपर्यपृच्छत ॥ २ ॥ ॥ अंबरीषउवाच ॥ ॥ सर्वेषामपिमासानांत्वत्तोमाहात्म्यमञ्जसा ॥ श्रुतंमयापुराब्रह्मन्यदाचोक्तंतदात्वया ॥ ३ ॥ वैशाखःप्रवरोमासोमासेष्वेतेषुनिश्चितम् ॥ इतितस्माद्विस्तरेणमाहात्म्यंमाधवस्यच ॥४॥ श्रोतुंकौतूहलंब्रह्मन्कथंविष्णुप्रियोह्यसौ ॥ केचविष्णुप्रियाधर्मामासेमाधववल्लभे ॥ ५ ॥ तत्राप्यस्यतुकर्तव्याःकेधर्माविष्णुवल्लभाः ॥ किंदानंकिंफलंतस्यकिमुद्दिश्याचरेदिमान् ॥ ६ ॥

पूर्वक सुननेकी मेरी अत्यन्त अभिलाषा है, हे ब्रह्मन्! यह मास विष्णु भगवान्‌को ऐसा प्रिय क्यों है, इस मासमें विष्णुप्रिय कौन कौनसे धर्म हैं ॥ ४ ॥ ॥ ५ ॥ इनमेंसेभी कौन कौनसे धर्म कर्त्तव्य हैं जो विष्णुको प्यारे हैं कौनसा दान कर्त्तव्य है और उसका फलभी क्या है तथा इस मासमें कौनसे देवताकी उपासना करनी चाहिये ॥ ६ ॥

केनर्हित्वामाराधयंतीत्यतआह महात्मानस्त्विति महात्मानः कामाद्यनभिभूतचित्ताः यतः अभयंसत्वसंशुद्धिरित्यादिनावक्ष्यमाणांदेवींप्रकृतिंआश्रिताःअतएवमद्य-
तिरेकेणनास्त्यन्यस्मिन्मनोयेषांते भूतादिंजगत्कारणमव्ययंचमांज्ञात्वाभजंति १३ तेषांभजनप्रकारमाह सततमितिद्वाभ्याम् सर्वदास्तोत्रमंत्रादिभिः कीर्त्तयं
तः केचिन्मामुपासते सेवंते दृढानिव्रतानिनियमाः येषांतादृशाः संतोयतंतश्चेश्वरपूजादिषु पाठांतरेइंद्रियोपसंहारादिषुप्रयत्नंकुर्वंतश्चकेचिद्भक्त्यानमस्यंतःप्र
णमंतश्चान्येनित्ययुक्ताः अवहिताःसर्वेसेवंते भक्त्येतिनित्ययुक्ताइतिचकीर्त्तनादिष्वपिद्रष्टव्यम् १४ किंच ज्ञानेति वासुदेवः सर्वमित्येवंसर्वात्मत्वदर्शनज्ञानं

महात्मानस्तुमांपार्थदैवींप्रकृतिमाश्रिताः भजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययम् १३ सततंकीर्तयंतोमांयतंतश्चदृढव्रताः नमस्यं
तश्चमांभक्त्यानित्ययुक्ताउपासते १४ ज्ञानयज्ञेनचाप्यन्येयजंतोमामुपासते एकत्वेनपृथक्त्वेनबहुधाविश्वतोमुखम् १५ अहंक्रतुरहं
यज्ञःस्वधाऽहमहमौषधम् मंत्रोऽहमहमेवाज्यमहमग्निरहंहुतम् १६

तदेवयज्ञः तेनज्ञानयज्ञेनमांयजंतः पूजयंतोऽन्येऽप्युपासते तत्रापिके
चिदेकत्वेनाभेदभावनयाएकमेवपरब्रह्मेतिपरमार्थदर्शनेनयजंतउपासतइत्यभेदभावनया केचित्पृथक्त्वेनदासोऽहमिति केचित्तुविश्वतोमुखंसर्वात्मकंमां
बहुधाब्रह्मरुद्रादिरूपेणोपासते १५ सर्वात्मतांप्रपंचयति अहमितिचतुर्भिः क्रतुः श्रौतोऽग्निष्टोमादिः यज्ञस्तुस्मार्त्तः पंचयज्ञादिः स्वधापित्रर्थंश्राद्धादिः
औषधमोषधिप्रभवमन्नंभेषजंवा मंत्रोयाज्यापुरोनुवाक्यादिः आज्यंहोमादिसाधनम् अग्निराहवनीयादिः हुतंहोमः एतत्सर्वमहमेव १६ ५९ ५९

नन्वेवंनानाविधानिकर्माणिकुर्वतस्तवजीववद्बंधः कथंनस्यादित्याशंक्याह नचेति तानिसृष्ट्यादीनिकर्माणिमांननिबध्नंति कर्मासक्तिर्हिबंधहेतुः साचा
सकामत्वान्ममनास्ति अतउदासीनवद्वर्त्तमानस्यमेबंधनंनापादयंति उदासीनत्वेकर्तृत्वानुपपत्तेः कर्तृत्वेचोदासीनत्वानुपपत्तेः उदासीनवत्स्थितमित्युक्त
म् ९ तदेवोपपादयति मयेति मयाऽधिष्ठात्रानिमित्तभूतेनप्रकृतिःसचराचरंविश्वंसूयंते जनयति अनेनमदधिष्ठानेनहेतुनाइदंजगद्विपरिवर्त्तते पुनः
पुनर्जायते सन्निधिमात्रेणाधिष्ठातृत्वात्कर्तृत्वमुदासीनत्वंचाविरुद्धमितिभावः १० नन्वेवंभूतंपरमेश्वरंत्वांकिमितिकेचिन्नाद्रियंतेतत्राह अवजानं

नचमांतानिकर्माणिनिबध्नंतिधनंजय उदासीनवदासीनमसक्तंतेषुकर्मसु ९ मयाध्यक्षेणप्रकृतिःसूयतेसचराचरम् हे
तुनाऽनेनकौंतेयजगद्विपरिवर्त्तते १० अवजानंतिमांमूढामानुषींतनुमाश्रितम् परंभावमजानंतोममभूतमहेश्वरम् ११ मो
घाशामोघकर्माणोमोघज्ञानाविचेतसः राक्षसीमासुरींचैवप्रकृतिंमोहनींश्रिताः १२

नीतिद्वाभ्याम् सर्वभूतमहेश्वररूपंमदीयंपरं
तत्वमजानंतोमूर्खाः मामवमन्यंते अज्ञानेहेतुः शुद्धसत्वमयीमपितनुंभक्तेच्छावशान्मनुष्याकारामाश्रितवंतम् ११ किंच मोघाशाइति मत्तोऽन्यद्देवतां
तरंक्षिप्रंफलंदास्यतीत्येवंभूतामोघानिष्फलैवाशायेषांते अतएवमद्विमुखत्वान्मोघानिव्यर्थानिकर्माणियेषांते मोघमेवनानाकुतर्काश्रितंशास्त्रज्ञानं
येषांते अतएवविचेतसोविक्षिप्तचित्ताः सर्वत्रहेतुः राक्षसींतामसींहिंसादिप्रचुराम् आसुरींचकामदर्पादिबहुलाम् मोहिनींबुद्धिभ्रंशकरींप्रकृतिंस्व
बहुलता१ भावमाश्रिताःसंतोमामवजानंतीतिपूर्वेणान्वयः १२ ७

पश्य मदीययोगमायावैभवस्याविनर्क्यत्वान्नविरुद्धं किंचिदित्यर्थः अन्यदप्याश्चर्यंपश्येत्याह भूतानिबिभर्त्तिधारयतीतिभूतभृत् भूतानिभावयतिपालय
तीतिभूतभावनः एवंभूतोऽपिममात्मापरंस्वरूपंभूतस्थोनभवति अयंभावः यथाजीवोदेहंबिभ्रत्पालयंश्चाहंकारेणतत्संश्लिष्टस्तिष्ठति एवमहंभूता
निधारयन्पालयन्नपिनतेषुतिष्ठामि निरहंकारत्वादिति ५ असंश्लिष्टयोरप्याधाराधेयभावंदृष्टांतेनाह यथेति अवकाशंविनाऽवस्थानानुपप
त्तेर्नित्यमाकाशेस्थितोवायुः सर्वगतोऽपिनाकाशेनसंश्लिष्यते निरवयवत्वेनसंश्लेषायागात् तथासतिसर्वाणिभूतानिमयिस्थितानीतिजानीहि ६

भूतभृन्नचभूतस्थोममात्माभूतभावनः ५ यथाऽकाशस्थितोनित्यंवायुःसर्वत्रगोमहान् तथासर्वाणिभूतानिमत्स्थानीत्यु
पधारय ६ सर्वभूतानिकौंतेयप्रकृतिंयांतिमामिकाम् कल्पक्षयेपुनस्तानिकल्पादौविसृजाम्यहम् ७ प्रकृतिंस्वामवष्टभ्य
विसृजामिपुनःपुनः भूतग्राममिमंकृत्स्नमवशंप्रकृतेर्वशात् ८

तदेवमसंगस्ययोगमाययास्थितिहेतुत्वमुक्तम् तथैवसृष्टिप्रलयहे
तुत्वंचाह सर्वेति कल्पक्षयेप्रलयकालेसर्वाणिभूतानिमदीयांप्रकृतिंयांति त्रिगुणात्मिकायांमायायांलीयंते पुनःकल्पादौसृष्टिकालेतानिविशेषेणसृ
जामि ७ नन्वसंगोनिर्विकारश्चत्वंकथंसृजसीत्यपेक्षायामाह प्रकृतिमितिद्वाभ्याम् स्वीयांस्वाधीनांप्रकृतिमवष्टभ्याधिष्ठायप्रलयेलीनंसंतंचतुर्वि
धमिमंसर्वंभूतग्रामंकर्माधिपरवशंपुनःपुनर्विविधंसृजामि कथंप्रकृतेर्वशात्प्राचीनकर्मनिमित्तंतत्स्वभाववलात् ८ ७ ७

किंच राजविद्येति इदंज्ञानंराजविद्याविद्यानांराजेतिराजविद्याच गुह्यानांराजेतिराजगुह्यम् विद्यासुगोप्येषुचअतिश्रेष्ठमित्यर्थः राजदंतादित्वादुपसर्जनस्य परत्वम् उत्तमंपवित्रमिदम् अत्यंतपावनमिदम् प्रत्यक्षावगमंचदृष्टफलम् धर्म्यंचधर्मादनपेतम् सर्वधर्मफलत्वात् कर्त्तुंसुसुखंच सुखेनकर्त्तुंशक्यमि त्यर्थः अव्ययम् अक्षयफलत्वात् २ नन्वेवमस्यातिसुकरत्वेकेनामसंसारिणःस्युस्तत्राह अश्रद्दधानाइति अस्यभक्तिलक्षणज्ञानसहितस्यधर्मस्ये ति कर्मणिषष्ठ्यौ इदंधर्ममश्रद्दधानाआस्तिक्येनास्वीकुर्वंतः उपायांतरेणमत्प्राप्तयेकृतप्रयत्नाअपिमामप्राप्यमृत्युयुक्तेसंसारवर्त्मनिनिमित्तेनिवर्त्तंते

राजविद्याराजगुह्यंपवित्रमिदमुत्तमम् प्रत्यक्षावगमंधर्म्यंसुसुखंकर्त्तुमव्ययम् २ अश्रद्दधानाःपुरुषाधर्मस्यास्यपरंतप अ
प्राप्यमांनिवर्त्तंतेमृत्युसंसारवर्त्मनि ३ मयाततमिदंसर्वंजगदव्यक्तमूर्तिना मत्स्थानिसर्वभूतानिनचाहंतेष्ववस्थितः ४ नचम
त्स्थानिभूतानिपश्यमेयोगमैश्वरम्

मृत्युव्याप्तेसंसारमार्गेपरिभ्रमंतीत्यर्थः ३ तदेवंवक्तव्यतयाप्रस्तुतस्यज्ञानस्यस्तुत्याश्रोतारमभिमुखीकृत्यतदेवज्ञानंकथयति मयेतिद्वाभ्याम् अव्यक्ताअतींद्रियामूर्तिःस्वरूपंयस्यतादृशेनमयाकारणभूतेनसर्वमिदंजगत्ततंव्याप्तम् अतएवकारणभूतेम यितिष्ठंतीतिम त्स्थानिसर्वाणिचराचराणिभूतानि एवमपिघटपटादिषुसर्वकार्येषुमृत्तिकेवतेषुभूतेषुनाहमवस्थितः असंगत्वात् ४ किंच नचेति नचमयिस्थितानिभूतानिअसंगत्वादेवमम ननुतर्हिव्यापकत्वमाश्रयंचपूर्वोक्तंविरुद्धमित्याशंक्याह मेऐश्वरमसाधारणंयोगंयुक्तिंअघटितघटनाचातुर्यं

अध्यायार्थमष्टप्रश्नार्थनिर्णयंसफलमुपसंहरति वेदेष्विति वेदेष्वध्ययनादिभिः यज्ञेष्वनुष्ठानादिभिः तपस्सुकायशोषणादिभिः दानेषुसत्पात्रार्पणादिभिः य
त्पुण्यफलंचोपदिष्टंशास्त्रेषुतत्सर्वमत्येति ततोऽपिश्रेष्ठंयोगैश्वर्यंप्राप्नोति किंकृत्वा इदमष्टप्रश्नार्थनिर्णयेनोक्तंतत्त्वंविदित्वाततश्चयोगीज्ञानीभूत्वापरमुत्कृ
ष्टमाद्यंजगन्मूलभूतस्थानंविष्णोःपरमंपदंप्राप्नोति २८ अष्टमेष्टविशिष्टेष्टसंपृष्टार्थाष्टनिर्णयैः अक्लिष्टमिष्टधामाप्तिःस्पष्टिताष्टमवर्त्मना १ इतिसुबो
धिन्यांटीकायामष्टमोऽध्यायः ८ ७ परेशःप्राप्यतेशुद्धभक्तेर्निश्चितमष्टमे नवमेतुतदैश्वर्यमत्याश्चर्यंप्रपंच्यते १ एवंतावत्ससमाष्टमयोःस्वी

वेदेषुयज्ञेषुतपस्सुचैवदानेषुयत्पुण्यफलंप्रदिष्टम् अत्येतितत्सर्वमिदंविदित्वायोगीपरंस्थानमुपैतिचाद्यम् २८ इतिश्रीमद्भग
वद्गी॰महापुरुषयोगोनामाष्टमोऽध्यायः ८ श्रीभगवानुवाच इदंतुतेगुह्यतमंप्रवक्ष्याम्यनसूयवे ज्ञानंविज्ञानसहितंय
ज्ज्ञात्वामोक्ष्यसेऽशुभात् १ यंपारमेश्वरंतत्त्वंभक्त्यैवफलभंनान्यथेत्युक्तेदानीमचिंत्यस्वकीयमैश्वर्यंभक्तेश्चासाधारणप्रभावंप्रपंचयिष्यन्
श्रीभगवानुवाच इदंत्विति विशेषेणज्ञायतेऽनेनेतिविज्ञानंउपासनंतत्सहितंज्ञानमीश्वरविषयमिदं अनसूयवेपुनःपुनःस्वमाहात्म्यमेवोपदिशतीत्येवंपरम
कारुणिकेमयिदोषदृष्टिरहितायतुभ्यंवक्ष्यामि तुशब्दोवैशिष्ट्ये तदेवाह गुह्यतममित्यादिना गुह्यंधर्मज्ञानंततोदेहादिव्यतिरिक्तात्मज्ञानंगुह्यतरम् त ५३
तोऽपिपरमात्मज्ञानं अतिरहस्यत्वात्गुह्यतमम् यज्ज्ञात्वाऽशुभात्संसारात्सद्यएवमुक्तोभविष्यसि १ ७ ७ ७

आवृत्तिमार्गमाह धूमइति धूमाभिमानिनीदेवता राञ्यादिशब्दैश्च पूर्ववदेवरात्रिकृष्णपक्षदक्षिणायनरूपषण्मासाभिमानिन्यस्तिस्रोदेवतालक्ष्यंते ए
ताभिर्देवताभिरुपलक्षितोयोमार्गः तत्रप्रयातः कर्मयोगीचांद्रमसंज्योतिस्तदुपलक्षितंस्वर्गलोकंप्राप्यतत्रेष्टापूर्तकर्मफलंभुक्त्वापुनरावर्त्तते अत्रापिश्रुतिः
तेधूममभिसंभवंतीत्यादिः तदेवंनिवृत्तकर्मसहितोपासनयाक्रममुक्तिः काम्यकर्मभिः स्वर्गभोगानंतरमावृत्तिः निषिद्धकर्मभिस्तुनरकभोगानंतरमावृ

धूमोरात्रिस्तथाकृष्णः षण्मासादक्षिणायनम् तत्रचांद्रमसंज्योतिर्योगीप्राप्यनिवर्त्तते २५ शुक्लकृष्णेगतीह्येतेजगतःशाश्व
तेमते एकयायात्यनावृत्तिमन्ययावर्त्ततेपुनः २६ नैतेसृतीपार्थजानन्योगीमुह्यतिकश्चन तस्मात्सर्वेषुकालेषुयोगयुक्तोभवार्जुन २७

त्तिः क्षुद्रकर्मणांजंतूनामत्रैवपुनःपुनर्जन्मेतिद्रष्टव्यम् २५ उक्तौमार्गावुपसंहरति
शुक्लेति शुक्लार्चिरादिगतिः प्रकाशमयत्वात् कृष्णाधूमादिगतिः तमोमयत्वात् एतेगतीमार्गौज्ञानकर्माधिकारिणोजगतःशाश्वते अनादीसंमते संसारस्यानादि
त्वात् तयोरेकयाशुक्लयानिवृत्तिंमोक्षंयाति अन्ययाकृष्णयातुपुनरावर्त्तते २६ मार्गज्ञानफलंदर्शयन्भक्तियोगमुपसंहरति नैतइति एतेसृतीमार्गौहेपार्थमो
क्षसंसारप्रापकौजानन्कश्चिदपियोगीनमुह्यति सुखबुद्ध्यास्वर्गादिफलंनकामयते किंतुपरमेश्वरनिष्ठएवभवतीत्यर्थः स्पष्टमन्यत् २७

नदेवंपरमेश्वरोपासकाः तत्पदंप्राप्यननिवर्त्तंते अन्येत्वावर्त्तंतइत्युक्तम् तत्रकेनमार्गेणगतानावर्त्तंतेकेनवागताश्चावर्त्तंतइत्यपेक्षायामाह यत्रेति यत्रय-
स्मिन्कालेप्रयातायोगिनोअनावृत्तिंयांति यस्मिंश्चकालेप्रयाताआवृत्तिंयांति तंकालंवक्ष्यामीत्यन्वयः अत्रचरश्मन्नुसारी अतश्चायनेऽपिदक्षिणइति
सूचितन्यायेनोत्तरायणादिकालविशेषमरणस्यविवक्षितत्वात् कालशब्देनकालाभिमानिनीभिरतिवाहिकीभिः देवताभिः प्राप्योमार्गउपलक्ष्यते
अतोऽयमर्थः यस्मिन्कालाभिमानिनीदेवतोपलक्षितेमार्गेप्रयातायोगिनउपासकाः कर्मिणश्चयथाक्रममनावृत्तिमावृत्तिंचयांतितंकालाभिमानिनी

यत्रकालेत्वनावृत्तिमावृत्तिंचैवयोगिनः प्रयातायांतितंकालंवक्ष्यामिभरतर्षभ २३ अग्निर्ज्योतिरहः शुक्लःषण्मासाउत्तराय
णम् तत्रप्रयातागच्छंतिब्रह्मब्रह्मविदोजनाः २४

देवतोपलक्षितंमार्गंकथयिष्यामीति अग्निज्योतिषोः कालाभिमानित्वाभावेऽपिभू
यसामहरादिशब्दोक्तानांकालाभिमानित्वात्तत्साहचर्याद्ग्रामणवमित्यादिवत् कालशब्देनोपलक्षणमविरुद्धम् २३ तत्रानावृत्तिमार्गमाह अग्निरिति अ
ग्निर्ज्योतिः शब्दाभ्यांतेर्चिषमभिसंभवंतीतिश्रुत्युक्तार्चिरभिमानिनीदेवतोपलक्ष्यते अहरितिदिवसाभिमानिनीशुक्लपक्षाभिमानिनी उत्तरायणरूपा
षण्मासाइत्युत्तरायणाभिमानिनी एतच्चान्यासामपिश्रुत्युक्तानांसंवत्सरदेवलोकादिदेवतानामुपलक्षणार्थम् एवंभूतोयोमार्गः तत्रप्रयातागताः भगव
दुपासकाजनाः ब्रह्मप्राप्नुवंति तथाचश्रुतिः तेर्चिषमभिसंभवंति अर्चिषाहरह्नआपूर्यमाणपक्षाद्यान्षण्मासानुदङादित्यप्रतिमासेभ्योदेवलोकमित्यादि न
हिसद्योमुक्तिभाजांसम्यग्दर्शननिष्ठानांगतिर्वाक्कचिदस्तिनतस्यप्राणाउत्क्रामंतीतिश्रुतेः २४ ५२

तत्रचकृतनाशाकृताभ्यागमशंकांवारयन्वैराग्यार्थंसृष्टिप्रलयप्रवाहस्याविच्छेदंदर्शयति भूतेति भूतानांचराचरप्राणिनांग्रामः समूहोयः प्रागासीत्स एवायं अहरागमे भूत्वारात्रेरागमेप्रलीयपुनरप्यहरागमेऽ वशः कर्मादिपरतंत्रः प्रभवतिनान्यइत्यर्थः १९ लोकानामनित्यत्वंप्रपंच्यपरमेश्वरस्वरूप-स्यनित्यत्वंप्रपंचयति परइतिद्वाभ्याम् तस्माच्चराचरकारणभूतादव्यक्तात्परः तस्यापिकारणभूतोयोऽन्यस्तद्विलक्षणोऽव्यक्तः चक्षुराद्यगोचरोभा वःसनातनः अनादिः सतुसर्वेषुकार्यकारणलक्षणेषुभूतेषुनश्यत्स्वपिनविनश्यति २० अविनाशेप्रमाणंदर्शयन्नाह अव्यक्तइति योभावः अव्यक्त

भूतग्रामःसएवायंभूत्वाभूत्वाप्रलीयते रात्र्यागमेऽवशःपार्थप्रभवत्यहरागमे १९ परस्तस्मात्तुभावोऽन्योऽव्यक्तोऽव्यक्तात्स नातनः यःससर्वेषुभूतेषुनश्यत्सुनविनश्यति २० अव्यक्तोऽक्षरइत्युक्तस्तमाहुःपरमांगतिम् यंप्राप्यननिवर्त्ततेतद्धामपरमंमम २१ पुरुषःसपरःपार्थभक्त्यालभ्यस्त्वनन्यया यस्यांतस्थानिभूतानियेनसर्वमिदंततम् २२

अनींद्रियोऽक्षरः प्रदेशनाशभूत्यइतितथाक्षरात्संभवतीदंविश्वमित्यादिश्रुतिष्वक्षरइत्युक्तः तंपरमांगतिंगम्यंपुरुषार्थमाहुः पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरित्यादिश्रुतयः परमगतित्वमेवाह यंप्राप्यपुनर्ननिवर्त्ततइति तच्चममैवधामस्वरूपम् अतोऽहमेवपरमागतिरित्यर्थः २१ तत्प्राप्तौचभक्तिरंतरंगोपायइत्युक्तमेवाह पुरुषइति सचाहंपरः पुरुषः अनन्ययाएकांतभक्त्यैवलभ्योनान्यथा परत्वमेवाह यस्यकारणभूतस्यांतर्मध्येभूतानिस्थितानि येनचकारणभूतेनसर्वमिदंजगत्ततंव्याप्तम् २२ ६

केवलंचंद्रार्कगत्यैवज्ञानंतेनथांअहोरात्रविदोनभवंति अल्पदर्शित्वात् युगशब्देनात्रचतुर्युगमभिप्रेतम् चतुर्युगसहस्रंतुब्रह्मणोदिनमुच्यतइत्यादिपुराणोक्तेः ब्रह्मणइतिचमहर्लोकादिवासिनामप्युपलक्षणार्थम् तत्रायंकालगणनाप्रकारः मनुष्याणांयद्वर्षंतद्देवानामहोरात्रम् तादृशैः अहोरात्रैः पक्षमासादिकल्पनयाद्वादशभिर्वर्षसहस्रैश्चतुर्युगंभवति चतुर्युगसहस्रंचब्रह्मणोदिनम् तावत्परिमाणैवरात्रिः तादृशैश्चाहोरात्रैः पक्षमा

रात्रिंयुगसहस्रांतांतेहोरात्रविदोजनाः १७ अव्यक्ताद्व्यक्तयःसर्वाःप्रभवंत्यहरागमे रात्र्यागमेप्रलीयंतेतत्रैवाव्यक्तसंज्ञके १८

सादिक्रमेणवर्षशतंब्रह्मणःपरमायुरिति १७ ततःकिमतआह अव्यक्तादिति कार्यस्याव्यक्तंरूपंकारणात्मकंतस्मादव्यक्तात्कारणरूपात् व्यज्यंतेअभिव्यज्यंतइतिव्यक्तयश्चराचराणिभूतानिप्रादुर्भवंति कदा अहरागमेब्रह्मणोदिनस्योपक्रमेतथारात्रेरागमेतस्मिन्नेवाव्यक्तसंज्ञके कारणरूपेप्रलयंयांति यद्वा तेहोरात्रविदइत्येतन्नविधीयते किंतुतेप्रसिद्धाअहोरात्रविदोजनाः यद्ब्रह्मणोऽहर्विदुस्तस्याह्नः आगमेअव्यक्ताद्व्यक्तयःप्रभवंति यांचरात्रिंविदुःतस्यारात्रेरागमेप्रलीयंतेइतिद्वयोरन्वयः १८ ५१

५ ५ ५ ५

तः एत स्य वः

यद्यप्येवंत्वंसफलभोऽसिततः किमतआह मामिति उक्तलक्षणामहात्मानोमद्भक्ताः मांप्राप्यपुनर्दुःखाश्रयमनित्यंचजन्मनप्राप्नुवंति यतस्तेपरमांसम्य-
क्सिद्धिंमोक्षमेवप्राप्ताः पुनर्जन्मदुःखानांचालयंस्थानंतेमामुपेत्यनप्राप्नुवंतीतिवा १५ एतदेवसर्वेष्वपिलोकेषुपुनरावृत्तिंदर्शयन्निर्धारयति आब्रह्मे-
ति ब्रह्मणोभुवनंवासस्थानंब्रह्मलोकस्तमपिव्याप्यसर्वेलोकाः पुनरावर्तनशीलाः ब्रह्मलोकस्यापिविनाशित्वात्तत्रत्यानामनुत्पन्नज्ञानानामवश्यं-
भाविपुनर्जन्म येएवंक्रममुक्तिफलाभिरुपासनाभिर्ब्रह्मलोकंप्राप्ताः तेषामेवतत्रोत्पन्नज्ञानानांब्रह्मणासहमोक्षोनान्येषाम् मामुपेत्यवर्त्तमानानां-

मामुपेत्यपुनर्जन्मदुःखालयमशाश्वतम् नाप्नुवंतिमहात्मानःसंसिद्धिंपरमांगताः १५ आब्रह्मभुवनाल्लोकाःपुनरावर्त्तिनोऽ-
र्जुन मामुपेत्यतुकौंतेयपुनर्जन्मनविद्यते १६ सहस्रयुगपर्यंतमहर्यद्ब्रह्मणोविदुः

तुपुनर्जन्मनास्त्येवेत्यर्थः १६ ननुच त-
पस्विनोदानशीलावीतरागास्तितिक्षवः त्रिलोक्याउपरिस्थानंलभंते शोकवर्जितमित्यादिपुराणवाक्यैस्त्रिलोक्याः सकाशान्महर्लोकादीनांउ-
त्कृष्टत्वंगम्यते विनाशित्वेचसर्वेषामविशिष्टेकथमसौविशेषःस्यादित्याशंक्यबहुकल्पकालावस्थायित्वनिमित्तोऽसौविशेषइत्याशयेनस्वमाने-
नशतवर्षायुषोब्रह्मणोऽहन्यहनित्रिलोक्याउत्पत्तिर्निशिनिशिचलयोभवतीतिदर्शयिष्यन्ब्रह्मणोऽहोरात्रयोःप्रमाणमाह सहस्रेति सहस्रंयु-
गानिपर्यंतोऽवसानंयस्यतद्ब्रह्मणोयदहस्तद्येविदुः युगसहस्रअंतोयस्यास्तांरात्रिंचयोगबलेनयेविदुस्तएवसर्वज्ञाःजनाः अहोरात्रविदः येषांतु

अथगुरुवेदांतवाक्यजाताऽवबुद्धस्वेष्टदेवा म८ . . . स्यात् प२ . . . दुखण्डम्. ८

सहितंमूलाऽज्ञानंस्वविषयकाज्ञानमपाकरोतिनाशयति ।मिथ्याप्रपंच . . . जनायत्वद . . .

त्यस्वस्वरूपभूताज्ञानंविलाप्यसकलविक्षेपनिरासात्मना सस्वयमेव . . . चर्याम् ॥ २८ ॥ . . . तपाद . . .

. . . ममाभिधानेन सएव . . . इत्याह । यइति । यःपुरुषः

धितजन्यभेदादिमलशून्यस्यातएवपरमपूर्णस्यमद्भिन्नत्वायोगादित्यर्थः ॥ ३३ ॥ किंच सतामिति । यास्म . . . युतानिनामानिनामरू

यःकृष्णेत्युदितःस्वभक्तहृदयेसंस्थाप्यलीलाकृतिंमूलाज्ञानमपाकरोतिसकलंमिथ्याप्रपंचोदयम् ॥
स्वात्मानंदविलासशांतवपुषाभातिस्वयंबोधतःप्रत्यग्ज्योतिरहंसएवविमलःकृष्णःपरःपूरुषः ॥
॥ ३३ ॥ सतांनित्यंचेतोविमलमरतिज्ञानसहितंनिमग्नंयद्ब्रह्मण्यनवधिसुखज्ञानजलधौ ॥ परि
त्यज्याज्ञानंदुरितनिबिडंभ्रांतिशरणंसएवाहंकृष्णःश्रुतिशतशिरोभिःप्रकटितः॥३४॥ पूर्वाचार्य
कृतंसमीक्ष्यविततंसद्दिग्जयंशांकरंतस्मात्सारमिमंयथामतिमयानिष्कृष्यशुद्धयैधियः ॥ वेदां
तार्थमयोयएषरचितोभूयात्सतांशंकरःसोऽयंशांकरदिग्जयोऽच्युतपदेभक्त्याविभक्त्यार्पितः॥३५॥

ष्यैविद. . . . परित्यज्यवैराग्यतत्त्वज्ञानसहितंसतांचित्तंनित्यंनिमग्नंसश्रुतिशतशिरोभिःप्रकटितःकृष्णएवाहमित्यर्थः ॥ ३४ ॥

नरहितःपूर्वस्वयं . . . माह पूर्वेति । पूर्वाचार्यैर्माधवाचार्यैःकृतंविस्तृतंशांकरंसदिग्विजयंसम्यग्वीक्ष्यतस्मादिमंसारंयथामतिनिष्कृष्य

र्थयुतान्निर्ष्टातसारमयोमयारचितोऽच्युतपदेभक्त्यापरप्रेम्णार्पितःसोऽयंशांकरदिग्विजयःसतांशंकरःस्यात् अच्युतपदसमर्पणेनाय

. . . तिसूचितम् ॥ ३५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

...ग्यतामाशंक्यपरिहरति । क्वचेति । भवचरितरसाढ्यःशिवचरितरसयुक्त एषजंतुरहंक ॥ ३६ ॥ तस्माद्भवप्रसादा
...य्यमेवसर्वथासमाश्रयणीयइत्याह । निरवधीति । अज्ञानविनाशस्यहेतुः ॥ ३७ ॥ स्वपरोपकारार्थंप्रवृत्तस्यममास्मिन्ग्रं

...नगमांशरोवाक्तारसिद्धांतगर्भोभवचरितरसाढ्योदिग्जयःशांकरोऽसौ ॥ क्वचपरिमितबु
द्धिर्जंतुरेषभ्रमाढ्योहरिहरकरुणांशादेषसिद्धस्तथापि ॥ ३६ ॥ निरवधिपरमार्थंप्राप्तुमिच्छेज्जनो
यःश्रुतिशिखरमतेनायासभीतोमुमुक्षुः ॥ स्फुटपदयुतएषोऽज्ञानविध्वंसहेतुर्गिरिशविजयसार
स्तेननित्यंविचार्यः ॥ ३७ ॥ अयंवेदांतानांपरमहृदयोग्रंथिहरणश्चरित्राढ्यःशंभोर्नयशतयुतः
शांकरजयः ॥ मुमुक्षूणांहृद्यःकृतइहसदानंदविदुषाकृपादृष्ट्यासद्भिःस्खलितमपिशोध्यंक्वचि
दिति ॥ १३८ ॥ ॥ इतिश्रीशांकरदिग्विजयसारेश्रीमन्मुकुन्दपदारविन्दमकरन्दरसाभिला
षिसदानंदाख्यविदुषाविरचितेश्रीमच्छंकराचार्यस्यभगवत्पूज्यपादाभिधानस्यमहेश्वरस्वरू
पाविर्भावपुरःसरनिजधामप्राप्तिर्नामषोडशःसर्गः समाप्तिमगात् ॥ १६ ॥

...जनाः अहार...वदः यषातु
...थेस्खलितमपिक्वचित्परपरिश्रमाभिज्ञैःसद्भिःकृपादृष्ट्याशोध्यमित्याह
...लगोपालतीर्थश्रीपादशिष्यदत्तवंशाव...

षोडशसर्गोक्तमर्थंसंक्षिप्योपसंहरति । इतीति । अतिश्रेष्ठांश्रुतिसंमतांयतिचर्याम् ॥ २८ ॥ एतिग्रंथिप्रातपाद[illegible]जनायत्वद[illegible]
येनेति ॥ २९ ॥ यस्यसर्वकारणस्यसर्वांतर्यामिणःस्वस्वरूपभूतस्यहरेःप्रसादादयंग्रंथःसमाप्तिंगतस्तमहंभजेइत्याह । यइति । यःपुरुषः
सृष्टेःपूर्वंनामरूपविनिर्मुक्तःस्वयंप्रकाशात्मनासीद्यश्चसर्गसमयेविभागजननींमायाभिधांस्वायत्तांप्रकृतिमधिष्ठायार्थयुतानिनामानिनामरू

इतिपशुपतिरीशोभूतलेस्वेच्छयासौश्रुतिशिखरगिरांसन्निर्णयायाजनिष्ट ॥ श्रुतिमतयतिचर्यां
संविधायातिवर्यांपुनरपिनिजलोकंस्वेच्छयागात्स्वयंभूः ॥ २८ ॥ येनादौसुरमंडलेसुरवरैःसं
प्रार्थितेनस्वयंवेदांताध्वसमर्थनायसुजनेसत्याप्रतिज्ञाकृता ॥ आविर्भूयमहीतलेस्वरचितैर्भा
ष्यैर्विदांसंमतैर्ब्रह्मात्मन्यवतारिताःसुकृतिनस्तंशंकराख्यंभजे ॥ २९ ॥ यःसृष्टेःपुरुषोऽभिधा
नरहितःपूर्वंस्वयंज्योतिषाह्यासीत्स्वाप्रकृतिंविभागजननीमाश्रित्यमायाभिधाम् ॥ नामान्य
र्थयुतानिसर्गसमयेसृष्ट्वाप्रविष्टःस्वयंजीवब्रह्मविभागतःश्रुतिशिरोवेद्यंहरिंतंभजे ॥ १३० ॥

[illegible]तेनप्रविष्टस्तंवेदांतवेद्यंहरिंभजे तद्देदंतर्ह्यव्याकृतमासीत् । सदेवसोम्येदमग्रआसीत् । मायांतुप्रकृतिंवि


॥ ॥ ग्यतामाशंक्यपरिहरति । ... तज्ज्ञातजगज्जन्मादिकारणत्वाज्जिज्ञास्यंलक्षयंक ... ःतिभगवद्वाक्या
...यथाह । विश्वस्येति । अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथा । मत्तःपरतरंनान्यत्किंचिदस्तिधनं
... पुनःसर्वशक्तिमान्श्रौतःश्रुतिप्रतिपादितःश्रुतिहेतुः वेदांतकृद्वेदविदेवचाहमितिभगवद्वचनात् निगमाःसर्वेऽपि ॥ २६ तत्कथंतद्विलक्षण
...परमतात्पर्यतःप्राहुस्तथाचजिज्ञासासूत्रोक्तजिज्ञास्यलक्षणाभिधायकानिजन्माद्यस्ययतः शास्त्रयोनित्वात् तत्तुसमन्वयादिति सू
त्राण्येतत्पराण्येवेत्यर्थस्तंकृष्णसंज्ञंहरिंजन्मादिसमस्तविकारविधुरंप्रत्यग्रूपंश्रीशंकराचार्यप्रसादाद्बुद्ध्वासर्वदाहमर्च्यत्वेनध्येयत्वेनज्ञेयत्वेनच

श्रोतव्यःश्रुतिवाक्यतःश्रुतिशिरःसिद्धांतजिज्ञासुभिर्विश्वस्यास्ययतोजनिस्थितिलयायःसर्वविच्छ
क्तिमान् ॥ यःश्रौतःश्रुतिहेतुरस्तिनिगमायंप्राहुरेकांततस्तंकृष्णाख्यमनादिमांतरमहंबुद्ध्यासदासंश्रये
॥ ३१ ॥ ब्रह्माद्वैतसदादिशब्दगदितोयोविश्वसृष्टेःपुरायस्यैवेक्षणमात्रतोजगदिदंसर्वंसमुन्मीलितम् ॥
यःसर्वत्रविराजतेस्वरचितंयःपातिसर्वात्मनायस्यैवस्मरणंविमुक्तिकरणंकृष्णंतमीशंभजे ॥ ३२ ॥

संश्रयेइत्यर्थः ॥ ३१ ॥ किंच ब्रह्मेति । सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयंब्रह्मेत्यादिश्रुतौयःसृष्टेःपुराब्रह्मादिशब्दप्रतिपादितःयस्यै
वचेक्षणमात्रेणसर्वमिदंजगत्सम्यगुन्मीलितमाविर्भूतं तदैक्षतबहुस्यांप्रजायेयेत्यादेःश्रुतेःयःसर्वत्रविराजते मयाततमिदंसर्वंजगदव्यक्तमूर्ति
नेत्युक्तःयःसर्वात्मनासूर्यचंद्रादिरूपेणयाति गामाविश्यचभूतानिधारयाम्यहमोजसा । पुष्णामिचौषधीःसर्वाःसोमोभूत्वारसात्मकइत्या
दिभगवद्वाक्यात्यस्यैवस्मरणंविमुक्तेःप्रकृष्टतमंसाधनं ओमित्येकाक्षरंब्रह्मव्याहरन्मामनुस्मरन् । यःप्रयातित्यजन्देहंसयातिपरमांगतिमि
त्युक्तेस्तमीशंकृष्णमहंभजइत्यर्थः ॥ ३२ ॥

॥ ॥

...लगोपालतीर्थश्रीपादाशिष्यदत्तवंशावत...


दुर्योधन.
मान्धिपाक.
ब्रह्मदेव.
ज्योतिष्मती तपश्चर्या करतीहै.



प्रद्युम्न, सांब, पृथ्वी
जीतनेको जाते हैं
ऋषि
विश्वजित् यज्ञ.
उग्रसेन.

वप्रस्य क्रीडा वप्रक्रीडा स्तूस, परिण
गजः तद्वत्प्रेक्षणीयं स्तं १ आसौ गज वप्रक्रीडा परिणत

॥श्रीगणेशायनमः प्रणम्यादौ जिनाधीशं त्रैलोक्योत्तमशासनं मेघदूतस्य काव्यस्य कश्चिदर्थं प्रकाश्यते १ […]श्चिदिति कश्चिद्यक्षः अनिर्दिष्टनामा रामगिर्याश्रमे
षु वसतिं निवासं चक्रे कृतवानित्यन्वयः कीदृशो यक्षः स्वाधिकारप्रमत्तः स्वाधिकारे प्रमादी अनवधानतायु[…]ः पुनः कीदृशो यक्षः भर्तुर्द्धनदस्य शापेन अस्तंगमितो म
हिमा सामर्थ्यं यस्य स अस्तंगमितमहिमा अस्तमितिमकारांतमव्ययं भर्तुराज्ञां न कुर्वंतीति ये च विश्वासघातकाः तेषां नाम न गृह्णीयात् शास्त्रादौ तु विशेषतः १ अतः क
श्चिदित्युक्तः किंभूतेन शापेन वर्षभोगेण वर्षं संवत्सरं यावद्भुज्यते इति वर्षभोग्यस्तेन पुनः कीदृशेन कांतायाः विरहो वियोगस्तेन गुरुः दुर्भरो दुस्तरस्तेन कांताविरहगुरुणा गु
रुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे इति विश्वः किंभूतेषु रामगिर्याश्रमेषु जनकतनयास्नानैः अवगाहनैः पुन्यानि पवित्राणि उदकानि येषु तेषु तथा तेषु पुनः किंभूतेषु

॥श्रीगणेशायनमः कश्चित्कांताविरहगुरुणा स्वाधिकारप्रमत्तः शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः यक्षश्चक्रे जनक
तनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु १ तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी नीत्वा मासान्
कनकवलयभ्रंशरिक्तप्रकोष्ठः आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

स्निग्धच्छायातरुषु स्निग्धाः सांद्राः छायातरवो नमेरुवृक्षा येषु तेषु तथा तेषु स्निग्धं तु मसृणे सांद्रे छाया[…]वृक्षो नमेरुः कामुको यक्षो मेघं वारिवाहं ददर्श अद्राक्षीत् कदा आ
षाढमासस्य प्रथमदिवसे अस्य कास्य दिवसे आदिवसस्तस्मिन् आदिवसे कीदृशं मेघं प्रथं विस्मि[…]णोपुनः कीदृशं आश्लिष्टसानुं आश्लिष्टानि आलिंगतानि सानूनि
शिखराणि येन स तं किं कृत्वा तस्मिन्नद्रौ चित्रकूटाख्ये कतिचिन्मासान् नीत्वा अतिवाद्य अष्टौ मा[…]सान् यापयित्वा इत्यर्थः कीदृशः अबलाविप्रयुक्तः कांताविरह पुनः कीदृशः
कनकस्य वलयं कटकं तस्य भ्रंशेन पातेन रिक्तः प्रकोष्ठ कलाचिका कूर्परादधः प्रदेशो यस्य स विरहदु[…]ःखात् कृशः इति पुनः कीदृशं मेघं वप्रक्रीडा उत्खातकेलयः उत्खातकेलयः
उत्खातकेलिः क्रीडा या वप्रक्रीडा निगद्यते इति विश्वः तासु परिणतस्तिर्यग्दंतप्रहारः तिर्य[…]ग्दत्तप्रहारस्तु गजं परिणतो मतः इति हलायुधः स चासौ गजश्च स इव प्रेक्षणीयो द
र्शनीयः सं वेश्विदाषाढस्य प्रथमदिवशे मेघं ददर्श इति मन्यंते तर्हि कथं शापांतो मे भुजंगश[…]यनादुत्थिते शार्ङ्गपाणौ केचित्सप्तमासान्नीत्वा तदाषाढस्य प्रथमदिवसे प्रधान


बलदेव रेवती विवाह.
रुक्मिणी स्वयंवर.
कृष्ण अष्टनायिका सह.